© 2015 IJSRSET | Volume 1 | Issue 6 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
International Journal of Scientific Research in Science, Engineering and Technology

# शक्तिविचार: न्यायशास्त्राभिमतं शक्तिस्वरूपम्

**डॉ. छगन लाल महोलिया**
व्याख्याता संस्कृत, महारानी श्री राजकीय स्नात्तकोत्तर, महाविद्यालय, भरतपुर।

शक्धातो क्तिन् प्रत्यये सति निष्पन्न शक्ति: शब्द:। शक्तिज्ञानं विना शक्यसम्बन्धरूपाया लक्षणाया ज्ञानासम्भवात् प्रथमं शक्तिरूपायां वृत्ते:- स्वरूपविषये भूषणकार इत्याहु: -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थै: शब्दानां सम्बन्धोयोग्यता तथा।।**

(इन्द्रियाणाम् = चक्षुरादीनां स्वविषयेषु = चाक्षुषेषु घटादिषु यथाऽनादियोग्यता = तदीय-चाक्षुषादिकारणता, तथा शब्दानामपि अर्थै: सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थ:।

शक्त्याख्य क: विषय:? इति जिज्ञासा विद्यते। प्रथमं प्रत्याख्यानाय शक्तिविषये नैयायिकाभिमतमुपक्षिपति ।

**न्यायशास्त्राभिमतं शक्तिस्वरूपम् -** न्यायदर्शनेऽपि पदेन पदार्थस्य सम्बन्ध एव शक्ति:। स च ''अस्मात् पदादयमर्थो बोद्धव्य:'' इत्याकारा पदजन्यबोधविषयत्वप्रकारिका अर्थविशेष्यिका या ईश्वरेच्छा 'इदं पदमिमर्थं बोधयतु' इत्याकारा अर्थविषयकबोधजनकत्वप्रकारिका पदविशेष्यिका वा या ईश्वरेच्छा, तद्रूप:। किन्त्वेवं सति आधुनिकसङ्केतिते देवदत्तादिपदे शक्तिर्न सिध्येदिति तदृशेच्छामात्रं शक्ति:, न तु ईश्वरीयत्वमपि विशेषणतया तत्र निविष्टमिति। तस्याश्चेच्छाया विषयत्वलक्षण: सम्बन्ध: पदे पदार्थे जन्यजनकभावसम्बन्धे बोधे चेत्येषां समेषां वाचकत्वं वाच्यत्वं वा प्रसक्तम्, तथापि तस्यां बोधनिरूपितजनकतावत्त्वेन विषयो वाचक:, बोधविषयत्वेन विषयो वाच्य इति जन्यजनकभावादौ न वाचकत्वाति प्रसङ्ग इति नव्यन्यायसिद्धान्त:। यद्वा तादृशबोधविषयको बोध एव शक्तिरित्यपि न्यायमतविशेष:।

**अत्र कलाटीकाकृतस्तु -**अर्थविशेष्यकेच्छामुक्त्वाविनिगमनाविरहात्पदनिष्ठात्वाच्च पदविशेष्यिका शक्ते:। इदं पदमिति। ईश्वरेच्छेति। शक्तिरित्यस्यानुषङ्ग: अयमेव तदीयसङ्केत इति व्यवह्रियते नैयायिकै:। प्राधान्येन बोधविषयत्वानवच्छिन्नेत्यपि जनकताविशेषणं बोध्यम्। एतच्छब्दजन्यार्थबोध विषयकेश्वरज्ञानमेव शक्ति-रित्यर्थ:।

**अत्ररत्नप्रभाकृतस्तु -**इदमभिन्न शब्दनिरूपितजन्यतावद्बोधनिरूपितविषयतावानर्थ: इत्यर्थविशेष्यिकेश्वरेच्छा शक्ति: सिद्धा।

अर्थस्य च विषयत्वरूपामर्थे निष्ठत्वसमबन्धेनान्वय:। विषयत्वस्य च निरूपकत्व-सम्बन्धेन 'बुध' धात्वर्थे बोधेऽन्वय:। बोधस्य च निरूपितत्वसम्बन्धेन जनकत्वरूप आख्यातार्थेऽन्वय:। जनकत्वस्य च स्वरूप सम्बन्धेन पदेऽन्वय: तिङन्तस्थले प्रथमान्तार्थविशेष्यकबोधस्यैव नैयायिकै: स्वीकृतत्वात्। तथा च 'इदमर्थनिष्ठविषयता-निरूपकबोधनिष्ठजन्यतानिरूपतिजनकतावत्पदम्'' इति पदविशेष्यिकेश्वरेच्छा शक्ति:। एवम् 'एतत्पदजन्यो बोध: एतदर्थनिष्ठविषयता निरूपको भवतु' इति बोधविशेष्यिका, तथा एतदर्थनिष्ठा विषयता एतत्पदजन्यबोधनिरूपिता भवतु' इति विषयताविशेष्यिका इति विनिगमनाविरहान्नानाविधेश्चेच्छ शक्ति:।

ईश्वरेच्छाविषयो यो बोधस्तन्निष्ठजन्यतानिरूपितजनकताख्यविषताश्रयत्वसम्बन्धे-नेच्छावत्त्वं वाचकत्वम्' इच्छीयबोधनिष्ठविषयितानिरूपितविषयतावत्वसम्बन्धेनेच्छावत्त्वं वाच्यत्वम् इति व्यवस्थासूपपादेति भाव:।

**अत्र उभयोटीकयो: साम्यं वैषम्यं च -**

IJSRSET1844809 | Received : 01 Dec-2015 | Accepted : 20 Dec-2015 | November-December-2015 [(1) 6 : 618-648 ]

कलाटीकाकार: विनिगमनाविरहात्पदनिष्ठात्वाच्च पदविशेष्यिका शक्ति: स्वीकरोति। तथा च रत्नप्रभाकार: -बोधनिष्ठजन्यतानिरूपित जनकतावत्त्वेनरूपेण ईश्वरेच्छावत्त्वम् शक्ति मन्यते। अर्थविशेष्यिकेश्वरसङ्केतशक्ति:। इति।

**अयमाशय:** -इदमर्थनिष्ठविषयतनिरूपकबोधनिष्ठजन्यतानिरूपकजनकता निरूपिताश्रयतावदिदं पदं भवतु, इत्याकार: पदविशेष्यक: जनकताश्रयत्व प्रकारक: शाब्दबोधो मन्तव्य:। जनकता-वत्पदमित्येवोक्त्वा विरमो न विधेय: अपितु भवतु, इत्यस्यापि घटकतया प्रवेश: कार्य: येन बोधयतु पदस्य विधिरूपो लोडर्थोऽन्वितो भवेत्। इच्छार्थेषु लिङ्लोटौ, इति पाणिनिसूत्रस्य चरितार्थं स्यात्।

एवं च अस्मात्पददादयमर्थो बोद्धव्य इत्यनेन वाक्येन एतत्पदजन्यबोध-विषयतायानयर्थो भवतु इत्याकारिका पदजन्यबोधविषयत्वप्रकारिका अर्थविशेष्यिका ईश्वरेच्छा शक्तिरित्यायाति। इदं पदमिमर्थं बोधयतु- इत्यनेन तु इदमर्थविषयक बोधजनकताश्रयतावदिदं पदं भवतु इत्याकारिका अर्धविषयकबोधजनकताश्रयत्वप्रकारिका पदविशेष्यिका ईश्वरेच्छा शक्तिरित्यायाति।

एवं च अस्मात्पदादयमर्थो बोद्धव्य इत्यस्य एतत्पदनिष्ठप्रकारतानिरूपितजन्यत्व-निष्ठप्रकारतानिरूपितबोधनिष्ठप्रकारतानिरूपितविषयत्वनिष्ठप्रकारतानिरूपितविशेषताश्रयोऽयं इति बोध: फलति। स्वपदजन्यबोधविषयत्यनिष्ठप्रकारतानिरूपितेश्वरेच्छीयाविशेष्य-तात्वं, पदस्यार्थे सम्बन्ध:।

इदं पदमिममर्थं बोधयतु, इति पक्षे तु एतदर्थनिष्ठप्रकारतानिरूपितविषयित्व-निष्ठकतप्रकारतानिरूपितबोधनिष्ठप्रकारतानिरूपितजनकत्वनिष्ठप्रकारतानिरूपिताश्रयत्वनिष्ठप्रकारतानिरूपितविशेष्यतावत्प दमिति बोध: फलति।

यद्यपि निरुक्तविशेष्यतासम्बन्धेनेश्वरेच्छावत्वस्यैव ईश्वरज्ञानवत्वस्य ईश्वरकृतिमत्वस्याऽपि च तत्पदशक्यत्वं निर्वक्तुं शक्यम्, तथाच ईश्वरज्ञानप्रयत्नयोरपि शक्तितत्त्वापति:। तथापि अनादितात्पर्यं ज्ञानस्येव हेतुत्वानुरोधेन ईश्वरेच्छाया एव तादृशाकारत्वस्य क्लृप्ततया तस्या एव शक्तिस्वरूपत्व स्वीकारात्।

ईश्वरज्ञानप्रयत्नयोस्तु तादृशकारत्वे प्रमाणाभावेनावलुप्तता ईश्वरज्ञानकृत्यो: शक्तित्वासम्भवात्।

'अस्मात्पदादयमर्थो बौद्धव्य: इत्याकारायामीश्वेच्छायाम् इदं पदमिमर्थं बोधयतु इत्याकारायां वेश्वरेच्छायां तव्यप्रत्यय लोट् प्रत्ययाभ्यामिच्छार्थकधातूनामेवोपपदत्वेन महामुनि पाणिनिना संकेतित्वात्। तथाहि 'इच्छार्थेषु लिङ्लोटौ' इति सूत्रम् पाणिनीयम्। इच्छार्थकधातुघटके पदे उपपदे सति लिङ्लोटौ साधुता बोध्या इति तदर्थ:। अनेन 'बोधयतु' इत्यस्य इच्छापदस्योपपदत्वे एव साधुताबोधनेन ज्ञानवृत्यो: शक्तित्वं ज्ञानं यदस्ति, तस्य शक्तितत्वमापादनीयं स्यात्। तस्याकारो बोधयति इति पदेनैव वक्तुं स्यात्, इति भाव:।

**अयम्भाव:** -शक्तिस्वरूपं निरूपयिष्यन् प्रकरणमारभते-शक्ति: क: पदार्थ: विषय:? इति जिज्ञासा विद्यते चेत्। प्रथमं प्रत्याख्यानाय शक्तिविषये नैयायिकाभिमतमुपक्षिपति-तर्कप्रवीणाः नैयायिका: - तर्कशब्दात् उक्थादित्वाट् ठक्। आहुरित्यनेन समबन्ध:। अस्मात् (प्रकृतात्) शब्दात् (घटप्रभृतिवर्णोघात्) अयं (निर्दिष्ट: घटत्वजातिविशिष्ट:) अर्थ: (आशय:) बौद्धव्य: ज्ञातव्य:। तथाच इदमभिन्नशब्दनिरूपितजन्यतावद् बोधनिरूपितविषयतावानर्थ:, इत्यर्थविशेष्यिको ईश्वरेच्छाशक्तिरिति रत्नप्रभायां स्पष्टम्। इत्थंरूपा पदप्रधाना, एतत्पदजन्यो बोध: एतदर्थनिष्ठविषयतानिरूपको भवत्विति बोधविशेष्यिका तथा च एतदर्थनिष्ठाविषयता एतत्पदजन्यबोधनिरूपिता भवत्विति विषयताविशेष्यिका चेति नानाविधा ईश्वरेच्छा शक्तिरित्याशय:।

शब्दप्रकारकार्थविशेष्यिका अर्थप्रकारकपदविशेष्यिका च या ईश्वरेच्छा तस्या एव सङ्केतत्वेन ग्रहणात् शक्तिसङ्केतयोरैक्येन लाघवमन्यादृशशक्ति स्वीकारे तु पदार्थद्वयकल्पनया गौरवं स्यादिति। मतमिदं प्राचीननैयायिकानाम्। नव्यानां मते तु इच्छैव शक्तिर्न तु ईश्वरेच्छा।

आधुनिकसङ्केतिते देवदत्तादिपदे शक्तिर्न सिध्येदिति तादृशेच्छामात्रं शक्तिः, न तु ईश्वरीयत्वमपि विशेषणतया तत्र निविष्टमिति। तस्याश्चेच्छाया विषयत्वलक्षणः सम्बन्धः पदे पदार्थे जन्यजनकभाव सम्बन्धे बोधे चेत्येषां समेषां वाचकत्वं वाच्यत्वं वा प्रसक्तम् तथापि तस्यां बोधनिरूपितजनकतावत्त्वेन विषयो वाचकः, बोधविषयत्वेन विषयो वाच्य इति जन्यजनकभावादौ न वाचकत्वाति प्रसङ्ग इति नव्य न्याय सिद्धान्तः। यद्वा तादृशबोधविषयको बोध एव शक्तिरित्यपि न्यायमतविशेषः।

**वैयाकरणसिद्धान्तलघुमञ्जूषायां मूले नैयायिकमतखण्डनः -**तन्न, प्रयोज्य प्रयोजकवृद्धव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्य तस्य ज्ञानमनुमाय ज्ञानस्य चोपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वा असम्बद्धस्य कारणत्वानुपपत्ति ज्ञानपूर्वकं कल्प्यमानस्य सम्बन्धस्य स्वयमनुपपद्यमानत्वेन गृहीतज-नकत्वघटितस्य ग्रहीतुमशक्यत्वात्। एतेन बोधजनकत्वमेव पदपदार्थयोः सम्बन्धः इत्यपास्तम्।

इच्छायाः सम्बन्धिनोराश्रयतानियामकत्वाभावेन सम्बन्धत्वासम्भवात्। ‘सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामक’ इत्यभियुक्त-व्यवहारात् यथा घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलम् इति विशिष्टबुद्धिनियामकश्च। नात्र तथा घटशब्द इच्छावान् तदर्थो वेच्छावानिति व्यवहारः।

‘‘जनकताशक्तिः (प्राचीनवैयाकरणमतः) इति पक्षे बोधजनकतायाः पदेऽर्थे च सत्वेऽपि तयोः परस्परं सम्बन्धस्य दुरुपपादत्वात्।’’

**रत्नप्रभाटीकाकारस्तु - शाब्दिकदृष्ट्या नैयायिकमतखण्डनः**यदि उक्ताया ईश्वरेच्छायाः भवद्भि शक्तित्वम् अभ्युपयते, तदा इदमस्माद् भवतु, दण्डाद् घटो भवतु - इति इच्छाविषयत्वमेव दण्डे घटनिरूपितजनकत्वं स्यात् ‘भ्रमणादिव्यापार विशिष्टस्य दण्डस्य का आवश्यकता?। ननु ज्ञानस्य कार्यकारणयोरेव स्थले इच्छारूपा शक्तिः, न तु अन्यस्मिन् कार्यकारणभावस्थले इति कृत्वा ‘दण्डाद् घटो भवतु इत्यापत्तिवाटितेव। इमामेवारुचिं मनसि कृत्वा आह- किं च ‘प्रमाणानां जनकत्वतद्धरितसम्बन्धातिरिक्त सम्बन्धेनैव प्रमेय सम्बद्धानां ज्ञानजनकत्वदर्शने नेह तयोः सम्बन्धत्वानौचित्यम्, इति तस्यायमभिप्रायः यदि ज्ञानस्य कार्यतास्थले एव भवता इच्छायाः शक्तित्वमभ्युपेयते- तदा प्रत्यक्षप्रमाणस्थले चक्षुरादिविषये तादृशो अतिप्रसङ्गांगलेप प्रतिष्यत्येव। चक्षुषाल्पज्ञानं जायतामिति इच्छाविषयत्वमेव जनकत्वं स्यात् इति। न च परोक्षज्ञानस्य कार्यतास्थले एवांय विचारः फलिष्यति, न तु प्रत्यक्षस्थलेऽपि इत्यत आह- किं चैवमिति।

‘धूमाद वह्निज्ञानं जायताम्’ इतीच्छाविषयत्वे बोधजनकत्वस्य स्वीकारे व्याप्ति ज्ञाननिष्ठायाः कारणताया उच्छेद प्रसङ्गः आपतितः।

ननु हि सर्वत्र परोक्ष ज्ञानीय कार्यकारणभावस्थलेऽयं विचारः, अपि शाब्दज्ञानस्य कारणतास्थले एवेच्छायाः शक्तित्वं स्वीकृतमस्ति, न तु सर्वत्र परोक्षज्ञाने इत्यरुच्या उच्यते - किंचेच्छाया जनकत्वस्य वा उभयवृत्तित्वाभावः अतश्च सम्बन्धलक्षणमेव तत्र न संघटते।

तदा तेन सम्बन्धेनार्थबोधस्य कः प्रसङ्गः, तदभावे शक्तिस्वरूपं न संगच्छते। यतः पदपदार्थयोः सम्बन्धस्यैव शक्तित्वस्वीकारोऽस्ति। न हि तत्र विषय इच्छावान्, इति व्यवहारो न भवति, इच्छायाः समवायेन चेतनवृत्तित्वात्, विषये तु विषयता सम्बन्धेन सम्बन्धित्वम्। विषयातासम्बन्धस्तु नहि वृत्तिता नियामकः।

**प्राचीनवैयाकरणमत विषये इत्याहु** – ‘जनकताशक्तिः’ इति पक्षे बोधजनकत्वस्याश्रतया पदे-अत्राश्रयता स्वरूपसम्बन्धावच्छिन्ना ग्राह्या, न तु समवायादिसम्बन्धावच्छिन्न, असम्भावात्। निरूपकतयार्थेऽपि सत्वात्। अर्थनिरूपितबोधजनकतायाः पदे सत्वमिति कृत्वा निरूपकतासम्बन्धेन सा जनकता अर्थेऽपि वर्तते - वर्ततां नाम, परन्तु निरूपकता सम्बन्धो नहि वृत्तितानियामकः अपितु सम्बन्धितानिमायक एव। यथा राजपुरुषयोः स्वस्वाभामिभावः सम्बन्धः

सम्बन्धितानियायक एव न तु वृत्तिता नियामक:, तावत्। न हि भवति व्यवहार: स्वस्वाभिभावसम्बन्धेन राजवान् पुरूष: पुरूषवान् राजा वा इति। मूलम् तस्मात् पद पदार्थयो: सम्बन्धान्तरमेव शक्ति: वाच्यवाचकभावापरपर्याया।

**अयमाशय:-** नव्या: उपर्युद्धृतम् ईश्वरेच्छैव शक्ति: सैव सङ्केत: सम्बन्धश्चेति नैयायिकमतं न स्वीकृवन्ति। इच्छाया: शक्तित्वसम्भवेऽपि सम्बन्धत्वा सम्भवात्। सा हि न प्रतियोग्यनु-योगिनोराधाराधेय भावपरिचायिका। सम्बन्धस्य हि त्रीणि वैशिष्ट्यानि समबन्धिद्वयभिन्नो भवति सम्बन्धिद्वयनिष्ठो भवति आश्रयतारूपेण विशेष्यविशेषणोभयसम्बन्ध ज्ञान नियामको भवति च सम्बन्ध:। घटवद् भूतलमित्यस्योदाहरणम्। अत्र संयोगरूप: सम्बन्ध:। स च घटभूतलाभ्यां भिन्न एवं किन्तु उभयसम्बद्धश्चघटनिरूपितसंयोगाश्रयो भूतलमिति विशेष्यविशेषणोभयसम्बधज्ञानपरिचायकश्चेति। अत्र न घट शब्दो न च तदर्थ एव इच्छावान् इच्छाया: चेतनधर्मत्वाद् घटादौ तदभावात्। तेनेश्वर इच्छा न सम्बन्ध:। सम्बन्धो हि सम्बन्धिभ्यां भिन्न उभयसम्बन्ध्याश्रितश्चैकश्च। स च नेच्छायामिति। रत्नप्रभाकारमतेन किञ्च 'अस्मात् पदादयमर्थो बोद्धव्य:, इदं पदमिममर्थं बोधयतु 'इतीच्छाया एवाकारौ भवितुमर्हत:, न तु बोधस्य, 'इच्छार्थेषु लिङ्लोटौ'' इति सूत्रेणेच्छार्थकधातूपपदत्व एव लिङ्गादीनां साधुत्वान्वाख्यानात्। अत्रेच्छा पदमुपप-दमस्त्येव, अतोऽपि इच्छाया एव शक्तित्वमिति यदि विभाव्यते, तदापि 'इदमस्माद भवतु' इतीच्छाविषयत्वमेव दण्डादावपि घटादिजनकत्वं स्यादिति बहूपप्लव: स्यात्।

अत: ईश्वरेच्छा शक्ति नैव शक्यते, अत्र द्विष्ठत्वं पदपदार्थभिन्न नास्ति, एवञ्च विशिष्टबुद्धि नियामकत्वमभाव अत: सम्बन्धत्व अभावात् शक्ति न।

**तार्किकाभिमतं शक्तिस्वरूपम् -**तार्किककाणां नये ईश्वरेच्छा शक्ति:, तस्या नानाविधं स्वरूपम्। तत्र 'अस्माच्छब्दादयमर्थो बोद्धव्य:' इति स्वरूपं गृहीत्वा विश्लेषणं क्रियते - अत्र समीपवर्तिबोधकेन इदंशब्देन उच्चारणकर्मीभूतं परामृश्यते, तस्याभेदेन (विशेषणविशेष्य-भावेन) शब्देऽन्वय:। शब्दपदोत्तरपञ्चम्या जन्यत्वमर्थ:, तत्र शब्दस्य निरूपितत्व-सम्बन्धेनान्वय:। जन्यत्वस्य च बोद्धव्यपदघटकबुधधा-त्वर्थे बोधेऽन्वय: स्वरूपसम्बन्धेन (आश्रत्यत्वसम्बन्धेन)। बोधस्य च निरूपितत्वसमबन्धेन तव्यप्रत्ययार्थविषयताया-मन्वय:। तस्याश्च स्वरूपसम्बन्धेनार्थेऽन्वय:। एवं संति- ''इदमभिन्नशब्दनिरूपित-जन्यतावद्बोधनिरूपितविषयतावानर्थ:'' इत्यर्थविशेष्यिका बोधविषयत्वप्रकारिका ईश्वरेच्छा। पुनश्च विनिगमकाभावात् - 'इदं पदमिममर्थं बोधयतु' इति पदविशेष्यिका बोधजनकत्वप्रकारिकाऽपि ईश्वरेच्छा भवति। तत्रेदमर्थस्याभेदेनार्थेऽन्वय:, अर्थस्य च अम्विभक्त्यर्थविषयतायां निष्ठत्वसम्बन्धेनान्वय:, विषयत्वस्य च निरूपकत्सम्बन्धेन बुधधात्वर्थे बोधेऽन्वय:, बोधस्य च निरूपितत्सम्बन्धेन जनक त्वरूपे णिजर्थेऽन्वय:, तस्य च निरूपितत्वसम्बन्धेन आख्यातार्थे आश्रयत्वेऽन्वय:, तस्य च स्वरूपसम्बन्धेन पदेऽन्वय:। तिङन्तस्थले प्रथमान्तार्थमुख्यविशेष्यकबोधस्यैव नैयायिकै: स्वीकृतत्वात्। पदविशेष्यिकेश्वरेच्छाया इदं स्वरूपम्।

तथा च – इदमभिन्नार्थनिष्ठविषयतानिरूपकबोधनिष्ठजन्यतानिरूपितजनकता-निरूपिताश्रयतावत् पदमिति वाक्यार्थबोध: सम्पद्यते।

एवम् - ''एतत्पदजन्यबोध एतदर्थनिष्ठविषयतानिरूपको भवतु'' इति बोधविशेष्यिका अर्थनिष्ठविषयतानिरूपकत्वप्रकारिकाऽपि ईश्वरेच्छा शक्ति:। पुनश्च ''एतदर्थनिष्ठा विषयता एतत्पदजन्यबोधनिरूपिता भवतु'' इति विषयताविशेष्यिका एतत्पदजन्य-बोधनिरूपितत्वप्रकारिका ईश्वरेच्छा। इत्थं नानाविधं स्वरूपमीश्वरेच्छारू-पाया: शक्तेद्र्रष्टव्यम्। एषु प्रथमं यदुक्तं स्वरूपम् अर्थविशेष्यकं बोधविषयत्वप्रकारकम्, तत्स्वरूपं विशदीक्रियते-

''अभेदसम्बन्धावच्छिन्नेदन्त्वावच्छिन्नप्रकारतानिरूपिता शब्दत्वाऽवच्छिन्ना या विशेष्यता तादृशविशेष्यत्वाऽवच्छिन्ना शब्दत्वाऽवच्छिन्ना निरूपितत्वसम्बन्धाऽवच्छिन्ना या प्रकारता, तादृशप्रकारतानिरूपिता जन्यत्वत्वाऽवच्छिन्ना या विशेष्यता, तादृशविशेष्यत्वाऽवच्छिन्ना जन्यत्वत्वाऽवच्छिन्ना स्वरूपसम्बन्धाऽवच्छिन्ना या

प्रकारता, तादृशप्रकरतानिरूपिता बोधत्वाऽवच्छिन्ना च या विशेष्यता, तादृशविशेष्यत्वाऽवच्छिन्ना बोधत्वाऽवच्छिन्ना निरूपितत्वसम्बन्धाऽवच्छिन्ना या प्रकारता, तादृशप्रकारतानिरू-पितार्थविषमतात्वाऽवच्छिन्ना या विशेष्यता, तादृशविषशेष्यत्वाऽवच्छिन्ना विषयतात्वावच्छिन्ना स्वरूप सम्बन्धाऽवच्छिन्नाया प्रकारता, तादृशप्रकारतानिरू-पितार्थत्वाऽवच्छिन्ना या विशेष्यता तादृशविशेष्य तानिरूपिका ईश्वरेच्छा शक्ति:'' इति परिष्कृतं स्वरूपं फलति।

पदविशेष्यकेश्वरेच्छाया: परिष्कृतं स्वरूपमित्थं बोध्यम् -

''अभेदसम्बन्धाऽवच्छिन्नेदन्त्वावच्छिन्ना या प्रकारता, तन्निरूपितार्थत्वाऽवच्छि-न्नार्थनिष्ठा या विशेष्यता, तदवच्छिन्नार्थत्वाऽवच्छिन्ना निष्ठत्वसम्बन्धावच्छिन्ना या प्रकारता, तन्निरूपिता विषयतात्वाऽवच्छिन्ना या विशेष्यता, तदवच्छिन्ना निरूपकत्व-सम्बन्धाऽवच्छिन्ना विषयतात्वाऽवच्छिन्ना या प्रकारता, तन्निरूपिता बोधत्वाऽवच्छिन्ना या विशेष्यता, तदवच्छिन्ना बोधत्वाऽ-वच्छिन्ना निरूपितत्वसम्बन्धावच्छिन्ना या प्रकारता, तन्निरूपिता जनकतात्वाऽवच्छिन्ना या विशेष्यता, तदवच्छिन्ना जनकतात्वाऽवच्छिन्ना निरूपितत्वसम्बन्धाऽवच्छिनना या प्रकारता, तन्निरूपिता आश्रयतात्वावच्छिन्ना या विशेष्यता, तदवच्छिन्ना श्रयतात्वाऽवच्छिन्ना स्वरूपसम्बन्धाऽवच्छिन्ना या प्रकारता, तन्निरूपिता पदत्वाऽवच्छिन्ना या विशेष्यता, तन्निरूपिका ईश्वरेच्छा' इति प्रतिफलितं स्वरूपम्।

''ईश्वरेच्छाया: शक्तित्वे वाचकत्वं वाच्यत्वं च कीदृशम्?''

तत्र 'अस्माच्छब्दादयमर्थो बोद्धव्य:', 'इदं पदमिममर्थं बोधयतु' इत्यनयोर्मध्ये पूर्वं वाच्यत्वस्वरूपं कीदृशमित्युच्यते- इच्छीयबोधनिष्ठविषयितानिरूपितविषयतावत्त्व-सम्बन्धेन इच्छावत्त्वं वाच्यत्वम्।

ईश्वरेच्छाविषयो यो बोधस्तन्निष्ठजन्यतानिरूपितजनकताख्यविषयताश्रयत्वसम्ब-न्धेनेच्छावत्त्वं वाचकत्वम्।

अत्रेदमालोच्यते यद् विषयतासम्बन्धस्य वृत्तिताया अनियामकतया 'घटो घटपदशक्यो न पट:' इत्यत्र शाब्दबोधो न स्यात्। येन सम्बन्धेन यत्पदार्थवत्त्वं यत्र भासते, तत्र नञ्समभिव्याहारस्थले तत्सम्बन्धाऽवच्छिन्नतत्पदार्थनिष्ठप्रतियो-गिताकाभाववत्त्वं प्रतीयत इति नियमेन वृत्तित्वानियामकसम्बन्धस्य प्रतियोगिताऽनवच्छेद-कत्वनियमेन विषयतायाश्चाभावीयप्रतियोगितावच्छेदकत्वासम्भवेन 'घटपदजन्यबोधीय-विषयतावत्त्वसम्बन्धेन ईश्वरेच्छावान् घट:, उक्तसम्बन्धाऽवच्छिन्नेच्छानिष्ठप्रतियो-गिताकाभाववान् पट:' इति बोधस्य प्रतियोगितायामुक्तसंसर्गाऽवच्छिन्नत्वस्यासम्भवेन वक्तुमशक्यत्वाद् इति चेदुच्यते- तादृशेच्छीयविशेष्यताया एव शक्तित्वम्, तत्र च स्वरूपसम्बन्ध एव प्रतियोगिताऽवच्छेदकतया स्वीकरणीय इति सर्वमनवद्यम्।

एवञ्च पदपदार्थविशेषनियन्त्रितायास्तादृशविशेष्यताया: शक्तित्वे सन्मात्रविषयिया ईश्वरेच्छाया: सर्वत्र सत्त्वेन सर्वपदस्य सर्वपदार्थत्वाऽऽपत्तिर्निरस्ता।

**वैयाकरणमतेन शक्तिनिरूपणम्-** तस्मात् पदपदार्थयो: सम्बन्धान्तरमेव शक्ति: वाच्यवाचक-भावा पर पर्याया। तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम्। तच्च सङ्केत:। तस्यापि च पदनिष्ठशक्त्यु-पकारकत्वाच्छक्तिरिति व्यव-हार:। तस्य सम्बन्धत्वाभावात्, भेदाभेदरूपस्य तस्य तत्त्वासम्भवात्, तदघटकभेदस्याभेदस्य वा तत्त्वादर्शनात्। अभेदस्यापि तत्त्वं खण्डयिष्यते।

**शाब्दिकमते शक्तिस्वरूपविषये कलाटीकाकृतस्तु -**वाच्यवाचकभावरूपसम्बन्ध शक्ति:। अत्र पदपदार्थयो: अध्यासमूलकं तादात्म्यम्। तादात्म्यं चेत्यर्थ:। सङ्केत इति। भेदाभेदरूपो द्विविध: सङ्केत: सम्बन्ध:। सङ्केतरूप तादात्म्यस्यापि चेत्यर्थ:। पदनिष्ठोक्तरूप शक्तिग्राहत्वाद् भाक्तव्यवहार इति भाव:।

**शाब्दिकमते शक्तिस्वरूपं रत्नप्रभाटीकाकास्तु**

आदिना बोधजनकताया: प्राचीन वैयाकरणभिमताया: ग्रहणम्। सा च वाच्यवाचकभाव पदेन व्यवहाय्र्या अस्ति, यथा देवदत्तपदेन देवदत्तकर्मा सपिण्डो व्यवहार्य्यो भवति। यदि वाचकत्वं बोधजनकत्वम्, वाच्यत्वं बोधविषयत्वमेव, हन्त तर्हि

बोधजनकत्वस्य शक्तित्वपक्षे यो दोष: सोऽत्रापि पक्षे समायात:, अतोऽखण्डोपा-धिरूपपदार्थान्तरं मन्यते। विशेषणीभूतो धर्मो घटकतया यत्र प्रविष्टो भवति स सखण्डोपाधि: यत्र च न प्रविष्ट, सोऽखण्डोपाधि:। बोधजनकत्वसमनियतोऽयं वाचकत्वरूपोऽखण्डोपाधि:। एवं बोधविषयत्व समनियतो वाच्यत्व रूपोअखण्डोपाधि:। शब्दार्थो यत्र निष्ठत्वमपि स्वस्वामि भावसम्बन्धवत्।

अत्र वाच्यवाचकसम्बन्ध: शक्तिज्ञापकञ्चेत्यर्थ। अस्य तादात्म्यमित्यत्रान्वय: एतेन तादात्म्यस्य शक्तिग्राहकत्वमेव न तु शक्तित्वमिति सूचितम्। अध्यासविषये 'अन्यस्मिन्नन्यधर्मावभासो-ऽध्यास:' यथा शुक्तो रजतत्वावभास:'।

'सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप:' इति भाष्यकृता स्वीकृतत्वाच्च। तथा च सङ्केतोद्विविध: भेदरूप, अभेदरूपश्च। आद्यो नैयायिकाद्यभिमत: द्वितीयो वैयाकरणमात्राभिमत:।

**उभयो: टीकयो: साम्यं वैषम्यं च**

इत्थं शक्तिविषये तार्किकमतं प्रत्याख्याय सम्प्रति स्वाभीष्टमतं प्रस्तौति- अत्र सम्बन्धान्तरपदेन न केवलं तार्किकमतं निराक्रियतेऽपितु मीमांसकानां बोधजनक-तावच्छेदकशक्तिमतं प्राचीनवैयाकरणानां बोधजनकतासम्बन्धमतमपि प्रत्याख्यायते। वाच्यं पदसंसूच्योऽर्थ: वाचकं तत्संसूचकपदं किन्तु न तु वाचकत्वं बोधविषयत्वरूपं न च वाचकत्वं बोधजनकत्वरूपमपितु अखण्डोपाधिरूपं पदार्थान्तरमेव यस्य वाच्यवाचकभावरूप शब्दार्थोभयनिष्ठत्वात् सम्बन्धत्वं सम्भवति तयो र्भावोऽवस्थिति: स एव अपरोऽन्य पर्याय: संसूचको यस्या: सा तादृशी वाच्यवाचकभाव पद प्रतिपाद्या।
तादात्म्यस्वरूपविषये टीकयो: साम्यं वर्तते। ते तादात्म्यं चेत्यर्थ: सङ्केत: मन्यते। सङ्केत द्विविध: -
स एव आत्मा यस्य तदात्मा तदात्मनो भावस्तादात्म्यम् पदपदार्थयोर्वाच्यवाचकपदप्रतिपाद्या शक्ति: यस्या ग्राहकं हि तयो: 'अयं घट:' इत्याकारकं तादात्म्यमेव यद्धि केवलमध्यासमूलकं न तु वस्तुत: यथा लोहितस्फटिकपदार्थयोस्तादात्म्यम्। शब्दार्थौ इतरेतराध्यासवत्त्वात् परस्परतादात्म्य परौ। तत्र यत्र-यत्र- इतरेतराध्यास: तत्र तत्र तादात्म्यमिति अन्वयव्याप्ति: यथा गुणगुणिनो नीलो घट इत्यादौ। यत्र न तादात्म्यं न तत्राध्यास इति व्यतिरेक व्याप्ति: यथा घटपटयो:।

**योगसूत्रेऽप्युक्तम् -**

''शब्दार्थप्रत्ययनामितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ''इति। सङ्केतस्तु इतरेतराधयासरूप: स्मृतयात्म-को योऽयं शब्द: सोऽयमर्थ: योऽर्थ: स शब्द: इत्येवमितरेतराध्यास रूपो हि सङ्केतो भवति। इत्येवमेते शब्दार्थप्रत्यया इतरेतराध्यास सङ्कीर्णा: गौरिति शब्द: गौरित्यर्थ: गौरिति ज्ञानम् --- इत्यादि।

निष्कर्षत: न हि ईश्वरेच्छा पदपदार्थयो: शक्तिस्तस्यास्तयो: परस्परसम्बन्धाद-र्शनात्। सम्बन्धं विना शक्ते: कार्यजनकत्वासम्भवात्। तेन पदपदार्थयोर्वाच्य वाचकभाव एव शक्ति: तस्याश्च इतरेतराध्यासमूलं तादात्म्यं ग्राहकम्। तादात्म्यस्य पदपदार्थोभय-निष्ठत्वेन विशिष्टबुद्धिनियामकत्वेन च सम्बन्धत्वमपि।

**पातञ्जलभाष्यसम्मति: -**

तदुक्तं पातञ्जलभाष्ये - 'सङ्केतस्तु पदपदार्थयोरितरेत-राध्यासरूप: स्मृत्यात्मको योऽयं शब्द: सोऽर्थो, योऽर्थ: स शब्द:' इति। इतरेतराध्यासो रूप्यतेऽनेनेति करणे घञ्। स्मृत्यात्मक इत्येनन ज्ञातस्यैव सङ्केतस्य शक्ति बोधकत्वं दर्शितम्। किञ्च पाणिन्यादिस्मार्त्तसङ्केतस्यैव वाचकतानियामकत्वं नत्वाधुनिकस्येत्याद्यपि दर्शितम्।

एवञ्चाधुनिकसङ्केतस्थले द्वादशेऽह्नि क्रियमाणनामस्थले च लक्षणा। तत्र घटगो-विन्दादिगुणाद्यारोपेण तन्मूलकतत्प्रवृत्ति-निमित्तारोपेण च बोध:। सम्बन्धश्च स्वशक्तस-ङ्केतविषयत्वम्। एतदर्थमेव सङ्केतोपयोग:।
अत एव ''तस्य भाव: '' इति सूत्रे भाष्ये डित्थादिषु प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्था-भावाद्भावप्रत्ययान्तवृत्तिर्न प्राप्नोति 'डित्थत्वम्' इत्याशङ्क्य 'प्राथमकल्पिकडित्थेन कृतां क्रियां गुणान् वा य: कश्चित् करोति, स उच्यते 'डित्थत्वं ते एतद्' एवं डित्था: कुर्वन्ति।

**पातञ्जलभाष्यसम्मत्तिविषये कलाटीकाकार: -**

इतरेतराध्यास: परस्परात्मकतारोप:। इतरेतराध्यासो रूप्यतेऽनेनेति करणे घञ्। 'सङ्केतकर्तुराहार्येतरेतराभेदारोपरूपो य इतरेतराध्यास: तद्रूप इत्यर्थ:। अध्यासस्व-रूपविषये उक्त: 'ओमित्येकाक्षरं ब्रह्म' इत्यादिश्रुतिषु 'वृद्धिरादैच्' इत्यादि व्याकरणे 'कम्बुग्रीवादिमान्घट:' इत्यादौ लोके, 'अमरा निर्जरा:' देवा: इत्यादौ कोशे, चं योऽयं शब्द: सोऽर्थो योऽर्थ: स शब्द इत्येवं इतरेतराध्याससरूपस्यैव सङ्केतस्य दर्शनात्।

अत्र 'करणे घञ्' घटितवाक्य: अपाठ:, तद् भाष्यविरोधात्। कर्मणि क्तिन् वा एतेन स्वरूपतो व्यावृत्ति:। बुद्ध्यात्मक इति वाच्ये उक्त। गौणमुख्यशक्तीत्यर्थ: अविशेषेण विनिगमनाविरहात्तस्यान्यदपि फलमाह। पाणिन्यादिप्रणीतस्मृत्यनूदितेश्वरसङ्केत इत्यर्थ: तस्य पदस्य एतावतां वर्णानामेवम् अनुपूर्वीकमेलनमस्यार्थस्य वाचकमिति प्रविभागरूप-विषय व्यवस्थेत्यर्थ:।
आधुनिक इत्यनेनोभयसङ्ग्रहेऽपि स्पष्टार्थं भेदेन पाणिन्यादिस्मार्तेत्य उभयव्या-वर्त्यमाह। घटगोविन्दादिगुणाद्यारोपेण तन्मूलकप्रवृत्तिनिमित्तारोपेण च बोध:। उभयत्रेत्यर्थ: गौणी न च लक्षणा।

घटाद्यर्थशक्तघटादिपद आधुनिकादि सङ्केतविषयत्वमित्यर्थ:। डित्थादीति विषये-उक्तसंज्ञाशब्दविषये इत्यर्थ: उक्तमित्यत्रा-स्यान्वय:। एतत्कल्प प्राक्तनकल्पभवेनेत्यर्थ:।

**पातञ्जलभाष्यसम्मत्ति: विषये रत्नप्रभाटीकाकार:**

तादात्म्यस्य अध्यासमूलकत्वमुक्तम् इत्यर्थ:। अध्यासरूपत्वमेव सङ्केतस्य लभ्यते न त्वध्यासमूलकत्वम्, तादात्म्यरूपत्वं वा तस्येति चेत्, न करणघञन्त 'रूप' शब्देन अध्यासो रूपं बोधकं यस्येति बहुव्रीहिणा अध्यासबोध्यत्वस्य लाभात्।

वस्तुतस्तु कर्मघञन्त 'रूप' शब्दस्यसाध्यास शब्देन तृतीयातत्पुरुषेऽभिप्रेता-र्थलाभसम्भवान्न इदं युक्तम्। इदं वैयाकरण अभिमतसंकेतस्वरूपम्। स्मृत्यात्मकविषये उक्तम् - स्मृतिविषय आत्मास्वरूपं यस्येत्यर्थात् स्मृतिविषय इत्यर्थ:। तथा च स्मृति: पाणिन्यादिशास्त्रं तत्र आत्मा यस्येति व्युत्पत्त्या स्मृतिबोधत इत्यर्थ:। तेन ऋषिपरिभा-षितानामेव शक्तिनियमकत्वं न त्वाधुनिकसङ्केतस्य अनियतत्वादिति सूचितम्।
जातिशब्दा: गुणशब्दा:, क्रियाशब्दा इति त्रयी शब्दानां प्रवृत्ति: इति पक्षे संज्ञा-मात्रस्य व्युत्पन्नत्वेन योगलभ्यार्थस्यारोपेणैव तत्र शक्ति: न तु पाणिन्यादिस्मृतिबोधित-सङ्केतस्यैव शक्तिनियामाकत्वे चेत्यर्थ:। आधुनिकसङ्केतेति शास्त्राबोधित आधुनिकसङ्केत: संज्ञाशास्त्रबोधित: स 'नाम' पदेन व्यवह्रियत इति भेद:। संज्ञास्थले नामस्थले चोभयत्रेत्यर्थ:।

घटगोविन्दादीति- यदा 'घट' इति कस्यचित् संज्ञा, 'गोविन्द' इति द्वादशेऽह्नि क्रियमाणं नाम तदा तत्र मुख्य 'घट' 'गोविन्द' गतगुणक्रियादीनारोप्य तन्मूलकतयैव घटत्वगोविन्दत्वरूपप्रवृत्तिनिमित्तयोरारोपेण तत्प्रकारतयैवाधुनिकघटगोविन्दयोर्बोध:।

तत्र प्रथमकल्पे यो डित्थो मुख्य: तद्गतगुणक्रियासजातीयगुणक्रिया आश्रयो य: स उच्यते डित्थत्वं त एतत्। एवञ्च प्राथमकल्पिकडित्थगतगुणक्रिया सदृशगुण क्रिया एव भावप्रत्ययार्थ: तदभिप्रायेणैव डित्थत्वादिशब्दप्रयोगदर्शनादिति फलति। तच्च डित्थशब्द-स्य तादृशगुणविशिष्टे लक्षणामन्तरा न सम्भवति, वृत्युपस्थापितप्रकारीभूतधर्मस्यैव भावप्रत्ययार्थत्वादिति तत्र लक्षणा स्वीकार्य्या।

**अयमाशय: -**

उक्तार्थं महाभाष्येण प्रमाणयति। भगवत्पतञ्जलिप्रोक्तयोगसूत्रभाष्ये कथितम् इतरेताध्यासपदार्थविषयिणी भूयसी व्याख्या रत्नप्रभायां कृताऽस्ति। तत्राऽयं निष्कर्षो बोध्य इतरेतराध्यासो नाम इतरेतर तादात्म्याध्यास: स रुप्यते निरुप्यतेऽनेनेति इतरेतराध्यासरूप:, अध्यासो नाम ज्ञानविशेष: तस्य तादात्मयरूपविष निरूप्यत्वात्, विषयनिरूप्यं हि ज्ञानं भवतीति नियम: सार्वजनीनोऽसत्येव एवं च इतरेतराध्यास-निरूपक: संकेत: तादात्यरूप इति फलितोऽर्थ:। कर्मघञन्तरूपशब्द इति पक्षे इतरेतराध्यासो न रूप्यते प्रकाश्यते बोध्यते इति इतरेतराध्यासरूप:। अत्रेतरेतराध्यास शब्दस्य करणतृतीयान्तता बोध्या, कर्तृतृतीयायां तु कर्तृकर्मणो: इति, षष्ठी प्रसङ्गो बोध्य:। किं च करणो घञन्तो अगतिकगतित्वं करणाधिकरयोश्चेति ल्युट्प्रसङ्गात्।

इतरेतराध्यासरूप शब्दस्य विग्रहोऽस्ति- इतरेतराध्यासो रूपं स्वरूपं आत्मा यस्य स:। अर्थात् इतरेतरस्य परस्परस्य अध्यास: आरोपिताभेद: रूपं स्वरूपमात्मा यस्येति। परे तु इतरेतराध्यासेन रूप्यते साध्यतेऽसावित्यपि विग्रहं कुर्वन्ति।

स्मृत्यात्मक: स्मृति: पूर्वज्ञानसंस्कार आत्मा प्राणो यस्येति स्मृति आत्मा स्वरूपं यस्येति वा तादृश: अयं शब्द: स: अर्थ: य: अर्थ: स शब्द: शब्द एवार्थ: अर्थ एव शब्द: न हि कृत एव सङ्केतोऽर्थमवधारयति अपितु स्मर्यमाणोऽपि। उभयोटीकयो: प्रश्न: क्रियते- यदि तु ओमित्येकाक्षरं ब्रह्म इत्यादौ एकमक्षरं यस्य वाचकतयेति विशेषं कृत्वा बहुव्रीहि: क्रियते, एकाक्षरवाच्ये वा लक्षणा क्रियते, तदा इष्टसिद्धौ सत्यामपि बहुव्रीहि प्रयुक्तं लक्षणाप्रयुक्तं वा गौरवमापतिष्यति। बहुव्रीहौ अन्यपदार्थकल्पना, लक्षणायां मुख्यार्थबाध:, तत् सम्बन्धज्ञानं चापेक्षितं भवति इति गौरवं गले पतितमेव। गौरवदोषग्रस्ततया लाघवरूपं तर्कसहकृतप्रमाणाभाव इत्यर्थ:। वृद्धिरादैजित्यत्र वृद्धि इति पदं वाचकम्, आ-ऐ-ओ इति वर्णत्रयं वाच्यम्, द्वयो: समानाधिकरणयेन निर्देशोऽस्ति। एवमेव कम्बुग्रीवादिमान् घट इत्यत्र घट इति वाचकनिर्देश:, कम्बुग्रीवादिमानिति वाच्यनिर्देश: द्वयो: समानाधिकरण्येन निर्देश: कृत एवेति तत्त्वम्। कम्बुग्रीवादिमान् घट इत्यादौ घट शब्दस्य घटशब्दबोध्ये लक्षणा एवं च कम्बुग्रीवादिमान् घटशब्द बोध्य इत्येवं सामानाधिकरण्यं फलति। घटशब्दबोध्यत्वं त्वन्यत्राऽपि अर्थलक्षणया तिष्ठति, कम्बुग्रीवा दिमत्वं तु घटे एव इतिरीत्या सामान्यविशेषभाव: पर्यवसन्न:।

स्मृत्यात्मक पक्षे रत्नप्रभायां संकेतित:- स्मृतिशब्दस्य स्मृतिविषये लक्षणा, आत्मशब्द: स्वरूप पर:। द्वितीय पक्षे संकेतस्य (तादात्म्यस्य) स्मृतेश्चाभेदाध्यवसाय:। वस्तुतस्तु स्मृतिषु पाणिन्यादि स्मृतिषु आत्मा स्वरूपं यस्येत्यपि विग्रहो मन्तव्य:। येन पाणिन्यादिस्मार्तृसंकेतस्येव वाचकतानियामकत्वं लभ्यते। अयमर्थ: अग्रे रत्नप्रभायां संकेतितोऽस्ति। एवं च द्वादशकेह्नि पिता नाम कुर्यादिति श्रुतिबोधितस्य, ऋष्यादि-संकेतिस्य वा नाम्न: कर्मकाण्डादौ ग्रहणं भवितुमर्हति, नतु शास्त्राबोधितस्याद्युतिकस्य यदृच्छाशब्दस्य डित्थादि शब्दसदृशशस्य। वृद्धिरादैजित्यादौ तु वृद्ध्यादि शब्दानां यदृच्छाशब्दत्वेऽपि ऋषिसंकेत विषयत्वात्साधुत्वे न कश्चन विवाद:। पाणिन्यादि स्मृतिषु- इति कथने आदि पदेनान्या अपि ऋषि प्रणीता: स्मृतयो ग्राह्या:। यथा गौतमसूत्राणि कणादसूत्राणि कपिलसूत्राणि, जैमिनि प्रभृतिसूत्राणि।

**मूले लघुमञ्जूषायां मन्तान्तरप्रदर्शनपूर्वकं भाष्यस्थकाथञ्चित्कपदस्य विवृत्ति:**

‘‘प्राथमकल्पिके तर्हि कथम् ? यथा तस्य काथञ्चित्क: प्रयोगस्तथा वृत्तिरपि’’ इत्युक्तम्। तत्र ‘शब्दरूपस्यार्थे आरोपात् तत्प्रकारमाश्रित्य यथा शब्द प्रयोग: स्तथा वृत्तिरपि इत्यर्थ:’ इति कैयट:। तत्पक्षे कथञ्चित्पदस्य न तथा स्वारस्यम्, अन्यत्राप्यारोप-स्यानुपयोग श्चेत्यन्य व्याचक्षते-

‘व्यक्तावेव शक्तिस्तस्या एव च विषयताद्वयेन भानमिति यथा शक्तिग्रहप्रयोग-योरुपपत्ति: तथा ‘त्व’ प्रत्ययस्यापि’ इति। एवं रीतेरन्यत्र क्वाप्यदर्शनेनात्रपक्षे ‘कथञ्चित्’ इत्युक्तिरत्यन्तं समञ्जसेति बोध्यम्। ‘अनादित्वात्संसारस्य ततोऽपि पूर्वतनडित्थादिगुणा-द्याश्रित्य प्रयोगादि’ इति कश्चित्। तत्र तत्त संकेतज्ञानादेव बोध: शक्त्याद्यभावेपीति न युक्तं वृत्यन्तरत्वापत्ते: वृत्तिजन्योपस्थितिं विना शाब्दबोधविषयत्वासम्भवाच्च। द्वादशेऽह्नि पिता नाम कुर्यात्’ इति श्रुत्या स्मृत्या वा नामत्वेन नामबोधेऽपि तत्तद्रूपेणश्वरेण सङ्केताकरणेन तत्रापि शक्तेर्दुरुपपादत्वात्। अत्र नामपदेनाह्वानकरणीभूतो बोधक: शब्द उच्यते।

**अत्र कलाटीकाकृतस्तु -**

प्राथमकल्पिको मुख्यो यो डित्थस्तदीयां क्रियां गुणान् वा य: करोति स डित्थ इत्युच्यते ‘‘यथा तस्य काथञ्चित्क: प्रयोगस्तथा वृत्तिरपि’’ अत्र काथञ्चित्क: प्रतीके इत्यर्थ:। अन्यथा शब्दान्निर्विकल्पकाभावेन निर्धर्मिता-अवच्छेदकशक्तिग्रहाभावेन च प्रयोग एव न स्यादित्यर्थ:। जात्यतिरिक्तपदार्थे विशेष्यताप्रकार-तयो: स अवच्छिन्नत्व नियमादिति भाव:। तं खण्डयति। तत्पक्षे इति कैयटव्याख्याने इत्यर्थ:। न स्वारस्यमिति। घटादिपदादपि शब्दप्रकारकबोधस्य दर्शनेनास्य प्रकारस्य सार्वत्रिकत्वात् कथञ्चित्पदस्य भाष्यस्थस्य स्वारस्यं न भवन्ति इत्यर्थ:। आधुनिकडित्थेऽपि संज्ञास्वरूपे वाच्ये त्वप्रत्ययसम्भवात्प्राथमिकडित्थगतक्रियारोपेण प्रवृत्तिरिति भाष्यस्य निष्फलत्वापत्तिश्चे-त्यर्थ:। संज्ञा शब्दे शब्दस्वरूपस्यैव प्रवृत्तिनिमित्तत्वात् तत्रैव प्रत्यय इति व्याख्याने तु भाष्ये कथञ्चित् शब्द प्रयोग: असमञ्जस्य एव स्यात्।

इति पूर्वोक्तदोषाद्धेतोरन्ये भाष्यमन्यथा व्याचक्षते इत्यर्थ:। विषयताद्वयेनेति। व्यक्तिरेवात्र डित्थशब्दार्थ:। तस्या एव प्रकारतया विशेष्यतया च भानम्। तथा च प्रकारताविशिष्टा व्यक्तिस्त्वप्रत्ययार्थ इत्यर्थ:। अस्या रीतेरन्यत्र दृष्टत्वाभावात् कथञ्चिदिति भाष्योक्ति: सङ्गेतेति भाव:।

अस्मिन् विषये कश्चित् अनेन इति- कथञ्चित् पदघटितोक्त भाष्यविरोधरूपा, संसारस्य नानादित्वम् इति आशयकप्राथम्येत्यादिशङ्कासमाधानरूपसर्वभाष्यविरोधरूपा अन्यत्र प्रतिपादितप्रलय सत्त्वेनानादित्वं न तस्येत्येवंरूपा चारूचि: सूचिता।

ननु सङ्केतज्ञानजन्यबोधे शक्ति जन्योपस्थितेरेव हेतुत्वमास्तां कृतं वृत्तिजन्यत्व-निवेशेन। किञ्च द्वादशेऽह्नि क्रियमाणनामस्थले स्मार्तसङ्केतस्य सत्वेनेश्वरसङ्केत सम्भवेन तद्वत्तस्यापि वाचकता नियमाकत्वमेवेति किमर्थं तत्रापि लक्षणाऽत आह। द्वादशेऽह्नि क्रियमाणनामस्थलेऽपि। अपिस्तदन्य: आधुनिकसङ्केतस्य, लक्ष्यस्य गङ्गायां घोष इत्यादेश्च समुच्चायक:। तथा च अत्र सर्वत्र बोधार्थं तत्त्वेन निवेश आवश्यक इति भाव:।

**अत्र रत्नप्रभाकृतस्तु -**

‘प्राथमकल्पिके तर्हि कथम्? इति विषये समाधानमाह कथञ्चिदेव काथञ्चित्कं विनयादित्वात् स्वार्थे ठक्। शब्दानां यत्किञ्चिद् धर्मावच्छिन्न एव शक्तिग्रहेण यत् किञ्चित् प्रकारिकैवोपस्थितिरित्युपेयते।

अन्यथा शब्दान्निर्विकल्पकज्ञानाभावेन निर्धर्मिता-अवच्छेदकशक्तिज्ञानाभावेन च बोध एव न स्यात्। एवञ्च डित्थादिशब्देन यथा शब्दगतानुपूर्व्या अर्थे समारोपेणानु-पूर्वीप्रकारको बोधस्तथा तादृशानुपूर्वीरूपेऽर्थे एव त्वादयोऽपि

स्युरिति भाष्याशयं कैयट आह। न स्वारस्यमिति- घटादिपदादपि शब्दप्रकारक बोधदर्शनेन तस्य सार्वत्रिकत्वात् भाष्यस्थस्य 'काथञ्चित्क' पदस्य स्वारस्याभाव इति भाव:। शब्दार्थयो: तादात्म्येना-नुपूर्व्या: शब्दे प्रकारत्वे अर्थनिरूपितप्रकारत्वस्यापि सुलभतया तादृशप्रकारीभूतार्थे भावप्रत्ययस्य सिद्धत्याऽऽरोपानुपयोग: स्यात्।
यद्वा आधुनिकडित्थेऽपि प्रकारीभूते संज्ञास्वरूपत्वादिप्रत्ययसम्भवात् प्राथमिक-डित्थगतक्रियाद्यारोपो निष्फल: स्यात्। द्वादशेऽह्नि क्रियमाणनामस्थले ''द्वादशेऽह्नि'' इति वचनात् संकेतस्य सत्वेन तस्य च शक्तिग्राहकत्वेन शक्तयैव बोधसम्भवालक्षणो-क्तिर्नसङ्गच्छत इति। ईश्वरस्य सर्वज्ञत्वात्तत्रापि चैत्रत्वादि विशेषरूपेणोच्चारणं कल्प्यत इति केचित्। ननु ''चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च '' इति भाष्ये नामपदेन यथा सुबन्तस्य ग्रहणं तथाऽत्र सुबन्तग्रहणे इष्टस्य साध्वसाधुसाधारणशब्देस्येष्टस्य ग्रहणं न स्यात आह्वानेति - आह्वानकरणीभूत इत्यर्थे उक्त संकेत ज्ञानाल्लक्षणया बोधकत्वात्।
सङ्केतस्य च लक्षणाप्रयोजकसम्बन्धज्ञानसंपादकतयोपयोग: प्रागुक्त एव। तस्माद्यत्र पाणिन्यादिस्मार्तसङ्केतस्तस्य वाचकत्वमन्येषां तु उक्तरीत्या लक्षणयैव बोधकत्वमिति सिद्धम्।

**अयमाशय: -**

प्रथमश्चासौ कल्पश्चेति कर्मधारये सति भवार्थे अध्यात्मादित्वाट्ठन् प्रत्यय:। अत्रेदं विचार्यते यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ, इति वार्तिकाकारमते गुणो नाम भेदकोभेद्यं च विशेष्यमित्येव लभ्यते। तथा च विशेष्यमात्र वाचकाद् भेदकमात्रे गुणे भावप्रत्यय:। घटादिशब्दानां घटत्वावच्छिन्नद्रव्यवाचित्वे जातत्वादिप्रत्यय:। जातिमात्रवाचित्वे तु शब्दार्थयो: तादात्म्यात् तत्समनियतानुपूर्वीरूपेऽर्थे भावप्रत्यय:। यद्वा जातित्वे। यदि स्वरूपेणोपरञ्जकं तद्विशेषणमित्युच्यते, शब्दश्च स्वरूपेणार्थप्रत्यासति- इत्युपरञ्जकत्वादानुपूर्व्येव प्रवृत्ति: निमित्तमित्यध्यस्तेन संज्ञावाचकानां संज्ञि प्रत्यायकत्वात् तदेव प्रवृत्तिनिमित्तम्। विषयताद्वयेन मानमित्यत्र प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया, तस्याश्च वैशिष्ट्यमर्थ:। विषयताद्वय विशिष्टाया-स्तस्या मानम्, तच्चमानं यथा घटस्य घटत्वेन, तथाऽत्र डित्थादीनां स्वरूपेणैव अखण्डोपाधिवत्। यथाशक्तिग्रहप्रयोगयो-रुपपत्तिस्तथा त्वप्रत्ययस्याऽपि, अत्र प्राथमक-ल्पिके डित्थेऽपि शक्तिरेव। शक्यताऽवच्छेदकत्व प्रकारीभूतायं व्यक्तावेव, विशेष्यत्वमपि तस्या एव। तद भाववति तस्यामानमेवारोप:। चैत्र इत्यत्र तु चित्रायां जातत्वम्, मैत्र इत्यत्र तु मित्रे सूर्ये भवत्वमित्यादिकमारोपणीयम्। निर्विकल्पकं ज्ञानं प्रत्यक्षस्थले एव, तत्र घट इत्यत्र घटत्वविशिष्ट इत्यर्थके सविकल्पके विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे घट इति विशिष्ट बुद्धावपि घटत्वरूपविशेषणज्ञानस्य हेतुतया घटघटत्वे, इति निर्विकल्पकप्र-त्यक्षस्य पूर्वं स्थिति: कल्पनीया भवति। अन्यथा विशिष्टसविकल्पकप्रत्यक्षस्यानुदयापत्ति: स्यात्। अत उक्तम् निर्धमिताऽवच्छेदकशक्तिज्ञानेन अभावेन च बोध एव न स्यादिति।

घटपदस्य घटत्वाऽवच्छिन्ने शक्तिस्तत्र घटो धर्मी, धर्मिताऽवच्छेदकं घटत्वम्। वस्तुतस्तु 'तदेत्ते डित्थत्वम्, इत्यत्र क्रियागुणाध्यासादत्र वृत्तौ डित्थत्वसहचरितयो: क्रियागुणयोस्त्वादय:, इत्युक्ति: क्रियागुणयोरभेदाध्यवसायपरा, एवं च संसारस्यानादि-त्वात् प्रथमकल्पस्यैवाभावेन पूर्वपूर्वकल्पस्थ डित्थगतक्रियागुणयोरुतरोत्तरडित्थेषु आरोपात् सर्वत्रैव डित्थादिपदात् आरोपितगुणादिषु त्वादिभावप्रत्ययानामुपपत्ति: सम्भवत्येवेति रहस्यविद:। अत्रापि पक्षे कश्चिदिति वदन् ग्रन्थकारोऽरुचिं सूचयति। तथाहि- प्राथमकल्पिक कथम्? इति प्रश्नस्य, यथा तस्य काथञ्चित्क: प्रयोग इत्युत्तरस्य च भाष्योक्तस्या संगति: स्यादिति।

'तत्र संकेतज्ञानादेव बोध:, इति कथनमपि न समञ्जसम्, शाब्दबोधजनकोप-स्थितिजनकस्यैव वृत्तित्वेन संकेतस्यापि वृत्तित्वापत्ते:। न च ''द्वादशेऽह्नि पिता नाम कुर्यात्'' इति श्रुत्या तत्रापि ईश्वरसंकेतसत्त्वान्न दोष:, तत्तदानुपूर्वीमत्पदघटितसंकेतस्यैव शक्तित्वात्। अन्यथा अपभ्रंशानामपि तव (नैयायिकस्य) मते शक्तत्वापत्ति:। न चैवं तात्पर्यस्यापि संकेतरूपत्वाच्छक्तित्वापत्ति:, पदार्थोपस्थितिजनकस्यैव संकेतस्य शक्तित्व-स्वीकारात्।

**व्याकरणसिद्धान्तलघुमञ्जूषायां एतद्विषये कौस्तुभाद्युक्तिखण्डनं -**

यत्तु पदपदार्थयोर्बोध्यबोधकभावनियामिका शक्तिरेव सम्बन्ध इति, तन्न शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात्। दीपगतप्रकाशकत्वशक्तावपि सम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात्। तदुक्तं हरिणा: -

**''उपकार: स यत्राऽस्ति धर्मस्तत्रानुगम्यते।**

**शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुण:'' । इति।**

उपकार इति - उपकार्योपकारयोरुपकारस्वभाव: सम्बन्धो यत्राऽस्ति तत्र धर्म: शक्तिरूप: कार्यं दृष्ट्वाऽनुमीयते। असौ सम्बन्ध: शक्तीनामपि कार्यजनने उपकारको गुणानामपि द्रत्याश्रितत्वनियामक: सम्बन्ध इति तदर्थ इति हेलाराज:। सम्बन्ध: पदे वाक्ये च। तदाह न्यायभाष्यकार: ''समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणं वाक्यलक्ष-णाया वा चोऽर्थलक्षणम्'' इति। अनेन हि पदेष्विव वाक्येष्वपि ऐश्वर: समय इति स्पष्टमे-वोक्तम्। वाक्यविषये समयग्राहकमाकाङ्क्षाद्यपि। समयज्ञानार्थमित्यस्य साधूनामित्यादि:।

**कलाटीकाकार: -**

अत्र कौस्तुभादावुक्तं 'नेदं युक्तं गौरवात्, किन्तु लाघवात्। घटबोधजननसामर्थ्यमेव घटादिपदानां शक्ति: इति खण्डयति- उपकार: स यत्राऽस्ति- दीपादिगतप्रकाशकत्वशक्तौ दीपादिगता या प्रकाशकत्वशक्ति: तस्याम् अपि। आलोकवि-षयसम्बन्धे आलोकस्य दर्शनस्य यो विषयो वस्त्वादि तेन य: सम्बन्धस्तस्मिन् विद्यमाने नान्यथा पदार्थद्योतकत्वम् तादृशसम्बन्धा भावे नैव प्रकाशकत्वम् इत्थम् अनुभूतत्वात्। स: तादात्म्यरूपसम्बन्ध: पदे वाक्ये च तदाहेति। इदम् (व्याकरणम्) पदलक्षणाया वाच: सङ्केतज्ञानार्थमन्वाख्यानं करणे ल्युट्, व्याकरणस्य मध्यमणिन्यायेनान्वय:। वाक्यरूपवा-च: अर्थलक्षणम्। कक्ष्णे ल्युट्। अर्थबोधजनकता बोधकमित्यर्थ:।

**रत्नप्रभाकार: -**

कौस्तुभाद्युक्तं घटादिविषयकबोध जनकघटादिपदानां सामर्थ्यमेव शक्ति: इति मतं खण्डयति- एतेन वाच्यवाचकभावापरपर्यायशक्ति: सम्बन्धनिरास:, शक्तिसत्वे बोधजन-कत्वं तद्भावे बोधजकत्वाभाव इति शक्ते: बोधजनकतानियामकत्वम्। शक्तेर्भिन्न एव सम्ब-न्ध: शक्ते: कार्यजनकत्वनियामकत्वेन दृष्ट: यथा दीपगतप्रकाशकत्वशक्ते: कार्यजनकत्वे दीपवस्तुनो: प्रकाशकत्वशक्तयुक्तसंयोगादिसम्बन्धसत्त्व एव वस्तुप्रकाशकत्वं नान्यथा तथा घटदादिगतशक्तेरपि शाब्दबोधरूपकार्यजननेसम्बन्धत्वे एवार्थबोधकत्वं नान्यथा तदाह- उपकार इति- यत्रोपकारस्वभाव: सम्बन्धोऽस्ति -तत्र शक्त्याख्यो धर्मोनुमीयतेऽ-सम्बद्धानां शक्तिसत्वेऽपि कार्यजनकत्वाभावादित्यर्थ:। (समयज्ञानार्थम्) सङ्केतज्ञानार्थम्। इदमित्यस्य व्याकरणमित्यत्रान्वय:।

**शाब्दबोधोपयोगिनी शक्तिर्यथा पदे तथा वाक्येऽपीति भाव:।**

**अयमाशय: -**

मूले शक्तिरेव सम्बन्ध इतीत्यत्र एवकारेण तादात्म्यस्य शक्तिग्राहकसम्बन्धस्य निराकरणं सूच्यते। यथा हि दीप: प्रकाशकशक्तिमान किन्तु तस्या: कार्यजनकत्वं तदैव सम्भवति यदा दीपवस्तुनो: शक्त्यतिरिक्तसंयोगादिसम्बन्धो भवति तयो: संयोग सम्बन्धा-भावे तु न दीपशक्ते: वस्तुप्रकाशकत्वं सिध्यति। तथैवात्र घटशब्दादिशक्तेरपि शाब्दबोध-रूपकार्यजननं शक्त्यतिरिक्त-सम्बन्धसत्त्व एव नान्यथा। शब्दार्थयोर्न हि संयोगादिसम्बन्धो अपितु तयोरनुमानेन तादात्म्यमेव सम्बन्ध इति।

उपकार: स यत्रास्ति, तत्र धर्म: शक्तिरूप: कार्यं दृष्ट्वाऽनुमीयते। अत्र शक्तिरूप: इत्यनेन तादात्म्यरूप इत्यर्थ: शक्त्युपकारकत्वेन तस्याऽपि शक्तित्वेन व्यवहार:, गुणानाम-पि द्रव्याश्रितत्त्वनियामक: सम्बन्ध: इति तदर्थ इति हेलाराज:। गन्ध: पृथिव्यामेव न जले नाऽपि तेजसि इत्येवं गन्धोपकारकत्वमस्ति, तत्र गन्धाधिकरणता पृथिव्यामेवेत्यत्र को हेतु:? इति प्रश्ने तत्रत्य: समवायसम्बन्ध एवेत्येव समाधानं समीचीनं स्यात्, तथैव शीतस्पर्शीजले एव।

उष्णस्पर्शस्तेजस्येव, अनुष्णाशीतस्पर्शीवायावेव, शब्द आकाशे एवेत्यादिषु किं नियामकम्? इति प्रश्ने एकमेवोतरं गुणानां तत्र तव धर्मिणि समवायसम्बन्ध एव अतएव स गुणानामपि गुणा:। एवमेव शब्दनिष्ठाया: शक्ते: बोधात्मककार्यजनने तादात्म्यमेवो-पकारकमिति शक्तीनामप्यसौ शक्तिरिति सिद्धान्तो मन्तव्य:। ईदृश्या: व्याख्याया: रत्नप्रभायामभावे त्वदीयान्यूनतैव प्रतीयते।

स: सम्बन्धो न केवलं पदपदार्थयोरेवापितु वाक्यवाक्यार्थयोरपि भवतीत्याशय:। उक्तार्थे न्यायभाष्यकारं प्रमाणयति। न्यायभाष्यकार: गौतम आह- 'समय ज्ञानार्थञ्चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणम्' अर्थात् समयस्य वाच्यवाचकभावद्योतकतादा-त्म्यरूपसङ्केतस्य ज्ञानमवबोधस्तदर्थम्। पदस्वरूपाया:। प्रकृतिप्रत्ययतत्तदर्थप्रदर्शन-पुरस्सरं बोधकम्।

अत्र विचारणीयं यत् लघुमञ्जूषायां हि तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यं तच्च सङ्केत:' इति तादात्म्यस्यैव सङ्केतत्वयुक्तं व्याख्यातञ्च रत्नप्रभायां यथा ननु अस्माच्छब्दा-दयमर्थो बोद्धव्य इत्याकारकेच्छाद्यात्मकत्वेनैव सङ्केतस्य प्रसिद्धत्वात् तादात्म्यं सङ्केत इत्यसङ्गतमिति चेन्न, शाब्दबोधोपपत्तये कल्प्यमानस्य सङ्केतस्य विनिगमनविरहेण तादात्म्यरूपत्वस्यापि सम्भवात्। सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप: इति भाष्यकृता स्वीकृतत्वाञ्च। तथा च सङ्केतो द्विविध: भेदरूपोऽभेदरूपश्च। आद्यो नैयायिकाद्यभिमत: द्वितीयो वैयाकरणमात्राद्यभिमत: इति।

अत्र तु इतरेतराध्यासस्यैव सङ्केतत्वमुक्तम्। महाभाष्येऽपि सङ्केतस्तु पदार्थयोरितरेतराध्यासरूप: इत्युक्तं यत्र इतरेतराध्यासेन रूप्यते इति सङ्केतस्येतरेतरा-ध्यास साधकत्वमुक्तम्। साधुशब्दानामेव सङ्केतज्ञानार्थमित्यर्थ:। तेनापभ्रंशीयसङ्केताबोध-कत्वेऽपि न क्षति:।

**वैयाकरणसिद्धान्तलघुमञ्जूषायां मूले वाक्यस्फोटे वात्स्यायन सम्मतिं प्रदर्श्य अध्यासनिरूपणम्** –

एतेन 'पदार्थे सम्बन्धग्रहवन्त्यपि पदानिवाक्याऽर्थे समयग्रहानपेक्षाण्येवेति वाक्यास्फोटो नैयायिकासम्मत:' इति परास्तम्। एतच्चोपरिष्टाद्वक्ष्याम:। पदस्यैवार्थबोधकम् अवयवार्थद्वारा व्याकरणमिति च सूचितम्। क: शब्द: 'कोऽर्थ:' इति प्रश्ने 'घट इत्ययं शब्द: 'घट इत्ययमर्थ:' इत्येकाकारोत्तरदर्शनात्तयोरध्याससिद्धि:। 'घट इत्याकारकं ज्ञानम्' इति व्यवहाराच्छब्दज्ञानयोरपि स: इतिशब्दस्य शब्दस्वरूपपरता तात्पर्यग्राह-कत्वात्। अत एव ''पदं श्रुतम्'' पदार्थं शृणु अर्थं वदति। इत्यादिव्यवहार:। शब्दार्थयोरि-तरेतराध्यासादेव ''वृद्धिरादैच् '' ''ओमित्येकाक्षरं ब्रह्म'' इति शक्तिग्राहकश्रुतिस्मृत्यो: समानाधिकरण्येन प्रयोग:।

**कलाटीकाकार:-**

पदार्थसम्बन्धग्रहणसापेक्षाण्यपि पदानि, न वाक्यानि वाक्यार्थसम्बन्धग्रहसापेक्षाणि आकाङ्क्षादिवशादशक्यस्यैव वाक्यार्थस्य प्रतीतेरित्यर्थ:। पदद्वयघटिताकाङ्क्षादिभि: वाक्यार्थ-बोधे वाक्यस्फोटस्य दुर्वारत्वात्। नैयायिकशिरोमणे: तद्भाष्यकारस्पष्टत्वादिति भाव:। ननु व्याकरणे साक्षात्पदतदर्थयो: उक्तत्वात्कथं तत्? साक्षात्तदन्वाख्यानस्य लघूपायेन दुष्करत्वात्। एतेन प्रकृतिप्रत्ययाद्यर्थबोधनतात्पर्यकत्वमात्र व्यवच्छेद:।

ननु भवतु सम्बन्धः तत्र, तथापि अध्यासे एव मानाभावेन कथं तद्ग्राहकत्वं तस्योक्त मत आह इति। तयोः शब्दतदर्थयोः। किं ज्ञानमिति प्रश्न ''घटः'' इति तथोत्तरदर्शनेन सिद्धस्त्रयाणामध्यास इति सूचयन्नाह - घट इति। अपिः शब्दार्थयोः समुच्चायकः।

'शक्तिग्राहकश्रुतिस्मृत्योः अत्र 'वृद्धिरादैच' इति पूर्वप्रयोग स्मृत्र्यर्थं एवं च 'ओमित्येकाक्षरं ब्रह्म' इति श्रुत्यर्थं पश्चातवर्तीप्रयोगः जातः। 'समानाधिकरण्येन प्रयोगः' समानमधिकरणं यस्य तस्य भावः समानाधिकरण्यम् - अत्र अधिकरणशब्दः अर्थपरकमस्ति।

**रत्नप्रभाकारः -**

एतेनेति - उक्तन्यायभाष्याद् वाक्येऽपि सङ्केतसाधनेनेत्यर्थः। पदार्थनिरूपितो यः शक्तिरूपः सम्बन्धो विषयतया तद्विशिष्टान्यपीत्यर्थः। वाक्यार्थ इति वाक्ये शक्त्यभावेन वाक्यार्थनिरूपितशक्तिमनपेक्ष्यैव शाब्दबोधं जनयतीति वाक्यस्फोटस्य शक्तत्वं नैयायिक-मतविरुद्धमिति निरस्तम्, वाक्यस्फोटस्योक्तरीत्या नैयायिकोपास्याऽचार्यैरेव स्वीकृतत्वात् पदद्वयादिघटिताकाङ्क्षादितो वाक्यार्थबोधे वाक्यस्फोटस्यापरिहरणीयत्वाच्च। वाक्यस्फोटस्य नैयायिकसम्मतत्वं प्रामाणिकत्वञ्चेत्यर्थः। ननु साक्षाद् व्याकरणेन पदवाव्यार्थयोरनुक्तत्वा-त्कथं, पदाद्यर्थबोधकत्वं तस्यात् आह-पदस्यैवेति- प्रकृतिप्रत्ययार्थबोधन द्वारा पदाद्यर्थ-बोधन एव तात्पर्यमिति भावः। नन्वस्तु सङ्केतस्तत्र तथापि सङ्केतस्याध्यासमूलकत्वाद-ध्यास एव मानाभावेन सङ्केतग्रहा सम्भवोऽत आह- कः शब्द इति शब्दार्थविषयके द्विविधेऽपि प्रश्ने 'घटः' इति समाना-कारोत्तरदर्शनेन शब्दार्थयोरध्याससिद्धिः। अन्यथा इति शब्देन श-ब्दार्थाभ्यां 'घट' इति वर्णचतुष्टयस्याभेदबोधो नोपपद्येतेति भावः।

**अयमाशय -**

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति विपुः इति सिद्धान्तेन लक्षणयेव वाक्यर्थे बोध इति मीमांसकाः। पदार्थबोधेनैव गतार्थगता वाक्यार्थो नैवाभ्युपेतव्यः स्वातन्त्रयेणेति तार्किकाः। मीमांसकनये सामान्यत इतरान्विते शक्तिः, विशेषत इतरान्विते लक्षणा, सम्बन्धस्येकत्व बोधे द्विरावृत्तिः। यथा नीलो घट इत्यत्र नीलाभिन्ने घटे तटपदस्य लक्षणा।

प्रश्नोत्तरयोः समानविषयकत्व भावस्येकमन्यथा आम्रान् पृष्टः को विदारानाचष्टे इति न्यायस्य प्रतिफलनमापद्येत। तत्र च घट इत्ययं शब्दः, घट इत्ययमर्थं इत्येकरूपेण घट-रूपेण शब्दस्यार्थस्य च स्वरूपवर्णनं क्रियते शिष्टैः। अतस्तयोः शब्दार्थयोः तादात्म्यस्या-ध्यासोऽवश्यं स्वीकत्तव्य। अपरं च घट इत्याकारकं ज्ञानमित्यस्याऽपि व्यवहारस्य सम्भवेन शब्दस्यापि ज्ञानेन सह तादात्म्याध्यासः सिध्यत्येव।

ननु घट इत्याकारकं ज्ञानामित्यत्र ज्ञानस्याकारो विषय इति अर्थपरोघटशब्दस्त-त्समभिव्याहृतस्य इति शब्दस्य कथमभेदबोधप्रयोजकत्वमत आह एवं चार्थपरोऽपि स इति शब्दमहिम्रा शब्दपर इति कृत्वा शब्दज्ञानयोरपि अध्यासः सिध्यति। तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन ज्ञानाभिन्नस्य शब्दस्य अभेदोऽर्थे इति अर्थज्ञानयोरपि किं वा शब्दार्थ-ज्ञानानामभेदाध्यासः सिद्ध इति तत्त्वम्, रत्नप्रभायां स्पष्टीकृतमिति बोध्यम्।

**वैयाकरणसिद्धान्तलघुमञ्जूषायां मूले तादात्म्यनिरूपणम्-**

तादात्म्यञ्च 'तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्'। अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः। तत्र भेदस्योदभूतत्वविवक्षया 'अस्यार्थस्यायं वाचकः' उञः प्रगृह्यम्' 'तस्य वाचकः प्रणवः ' इत्यादौ षष्ठी। अभेदस्य तत्त्वविवक्षया तु, प्रथमा, यथा उक्तेषु। अत एवार्थे शब्दधर्मत्वव्यवहारः, अत्यन्त भेदेऽश्वपुरुषयोरिव तद् व्यवहाराभावात्। नाप्यत्य-न्ताभेदे सः घटे स्वधर्मत्वव्यवहाराभावात्। अयमध्यासः आदिव्यवहारकृदीश्वर कृत एव। एवञ्च ''स्थितोऽस्य वाचकस्य वाच्येन सह समबन्धः, सङ्केतस्तूक्तरूप ईश्वरस्य स्थितमे-वार्थमभिनयति यथावस्थितः पितापुत्रयोः सम्बन्धः सङ्केतेनावद्योत्यते 'अयमस्य पिता' अयमस्य पुत्रः इत्यादिना पातञ्जलभाष्ये एव स्पष्टम्। हरिरप्याह -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**
**सम्बन्ध (न्धि) शब्दे सम्बन्धो योग्यतां प्रति योग्यता।**
**समयाद्योग्यतासंविन्मतापित्रादि योगवत्।।**
**सति प्रत्ययहेतुत्वं सम्बन्धे उपपद्यते।**
**शब्दस्यार्थे यतस्तस्मात् सम्बन्धोऽस्तीति गम्यते।।**

अस्यार्थ: यथा चक्षुरादीनां रूपादिविषयज्ञानजनने अनादि: पुरुषयत्नानपेक्षा योग्यता तज्जनकतावच्छेदकधर्मवत्त्वरूपा, तथा शब्दानामर्थे अनादि: सम्बन्ध एव योग्यता = तज्जनकतावच्छेदको धर्म:। सम्बन्धशब्दे योग्यतां प्रतिबोधजनकतावच्छेदकधर्मरूप-योग्यतानिरूपतो यस्तादात्म्यलक्षण: सम्बन्ध: स एव योग्यता, सा स्वाभाविक्येव अनादिवृद्धव्यवहारपरम्पराऽपरपर्यायास्मदादिसमयगृहीतोक्तेश्वरसमयान्निश्चीयते। यथा मातापुत्रयोर्जन्यजनकभावसम्बन्धस्य व्यवहारो निश्चायकस्तद्वत्। न तु जनकत्वमेव योग्यता 'एतज्जननेऽयं योग्य:' इति व्यवहारात् तदाह सतीति- यत: शब्दस्यार्थे सम्बन्धे सति तत्प्रत्ययहेतुत्वमुपपद्यते तस्मादित्यन्वय:। अत एवैतदुपक्रमे-

**ज्ञानं प्रयोक्तुरर्थश्च स्वरूपञ्च प्रतीयते।**
**शब्दैरुच्चरितैस्तेषां सम्बन्ध: समवस्थित:।।**

इत्यादिना शब्दार्थज्ञानानामध्यासस्योपपादनं कृतम्। तेषाम् इत्यस्य 'अत:' इत्यादि:। अयं सास्नादिमानर्थो गौ: इत्यर्थकात् 'अयं गौ:' इत्येवं लोकानां व्यवहारादुक्तं तादात्म्यं सम्बन्ध इत्यर्थ:।

एतेन तयोरभेदे घटादिशब्दे मधुधारणाद्यापत्ति: अग्न्यादिशब्दोच्चारणे मुखदाहा-द्यापत्ति:, अर्थे वर्णमालाद्यनुभवापत्तिश्चेति निरस्तम् भेदाभेदोपपादनात्।

**कलाटीकाकार: -**

ननु सङ्केतस्याध्यासरूपत्वेन ज्ञानरूपत्वात् कथं तादात्म्यस्य तत्त्वम्? ''तस्य आत्मा इव आत्मा यस्य स तदात्मा, तस्य भावस्तादात्म्यम्'' इति व्युत्पत्या तस्य भेदविशिष्टभेदरूपत्वं विशेषं वक्तुमुक्तमध्यासमूलकतादात्म्यत्वरूपं स्वरूपतस्तस्यातत्त्व-मत आह- तादात्म्यं चेति। तादात्म्यस्य तात्त्पर्यमस्ति यत् भेदाभेदयो: विरोधेन भेदे सत्यभेदस्य बाधितत्वेन विनाऽध्यासं विशिष्टतत्स्वरूपस्यैवासिद्धिरिति ज्ञानगर्भत्वमाव-श्यकमिति विकल्परूपमिदमिति भाव:।

तथा च तादृशस्य भेदविशिष्टाभेदस्य तत्त्वं सिद्धम् व्यवहाराभावादिति दृष्टान्ते मिथ: तत्तद्धर्मत्वव्यवहाराभाववदत्रापि तद्व्यवहाराभावापत्तेरित्यर्थ: दीपस्य प्रकाशवत्स्थित एवास्य वाच्यस्य वाचकेन सहाविभागरूप: सम्बन्धस्तदेव वाचकत्वम्। अन्योयाध्यास-रूप: ईश्वरस्य सङ्केतस्तु अनादिवासनासिद्धं स्थितमेव तं प्रकाशयति। यथा विद्यमान एव पितापुत्रयो: सम्बन्ध: 'अयमस्य पिता' 'अयमस्य पुत्र:' इति सङ्केतेनावद्योत्यते इति।

सर्वेषां शब्दानां सर्वैरर्थै: सम्बन्धोऽनादिरेव ईश्वरसङ्केतस्तु प्रकाशको नियाम-कश्चेति। उक्तरूप: इतरेतराध्यासरूप ईश्वर सङ्केतस्तु स्थितमेव वस्तु अभिनयतीत्यर्थ:। उक्तेऽर्थे सम्मत्यन्तरमप्याह- हरिरपीति अत्राद्यकारिका तज्जनकतैव शक्तिरित्यर्थे साधकत्वेन लिखिता दीक्षितैर्वैयाकरणमतोन्मज्जने। भूषणकृतापि तथैव व्याख्याता।

**रत्नप्रभाकार:**

ननु शब्दार्थयोस्तादात्म्येऽग्निशब्दोच्चारणे मुखदाहाद्यापत्तिर्स्यात् 'अयं वाचक:' इति व्यवहारानुपपत्तिश्चेत्यतो अध्यासमूलक तादात्म्यस्वरूपमाह- अध्यासमूलकस्य भेदविशिष्टाभेदस्य तादात्म्यरूपत्वान्न दाहादिरिति भाव:।

तेषु तेषु पदेष्वनादित: सिद्धमेव वाच्यवाचकभावकरूपं शक्तिविशेषमीश्वरसङ्केतो अभिनयति प्रकाशयतीत्यर्थ:। न तूत्पादयति। दीपो यथा स्थितान्येव वस्तूनि प्रकाशयति, यथा वा स्थित एव पितापुत्रयोः जन्यजनक भावरूप: सम्बन्ध:

'अयमस्य पिता, अयमस्य पुत्रः' इतिलोकव्यवहारेणव्यञ्जयते। यद्यपि पूर्वमन्योऽन्याध्यासमूलकः तादात्म्यरूपः सङ्केत उक्तो भाष्ये तथाप्यस्माद् भाष्याद् एतादृशोऽपि सङ्केत इष्ट एव। तथा च शब्दार्थयोर्द्विविधसङ्केतदर्शनेन भेदाभेदौ सूचितौ। प्रलयानन्तरं पुनः सर्गेऽपि पूर्ववत्तत्तच्छक्तियुक्तानामेव शब्दानामाविर्भावाद् वाच्यवाचकभावशक्त्यपेक्षः सङ्केत ईश्वरेण पूर्ववदेव क्रियते। अत एव 'यथापूर्वमकल्पयत्' इति श्रुतिः सङ्गच्छते।

हरिणानुसारेण अत्राद्यकारिकाबोधजनकतैव शक्तिरित्यत्र मानत्वेनोक्ता दीक्षितैः। दीक्षितमते बोधजनकतैव योग्यतो इति स्पष्टम्।

**निष्कर्षः**

इत्थं शब्दार्थयोः तादात्म्यस्वीकारेऽस्यार्थस्यायं शब्दो वाचक इति तयोर्भेदबोधकव्यवहारः कथं सिध्यतीत्यततः तादात्म्यस्वरूपमाह-तस्य आत्मा इव आत्मा यस्य स तदात्मा, तस्य भावस्तादात्म्यम् इति व्युत्पत्या व्याकरणशास्त्रदृष्ट्या। तद् भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमेव तादात्म्यमिति सिद्धान्तः शाब्दिकनये स्वीकृतोऽस्ति। तत्र शब्दस्यार्थे भेदो वास्तवः अभेदस्तु आरोपितः इति न भेदाभेदयोः विरोधः। श्रीहरिवृषभेण वाक्यपदीयटीकायां एतत्स्वरूपं सूचितमस्ति- बुद्ध्या गृहीतार्थप्रतिपादनाय शब्दप्रयोगादर्थः शब्दस्य निमित्तम्। कार्यकारणयोश्चाभेदाध्यवसायात् सोऽयमिति प्रतीयमानं तादा-त्म्यम् इत्युक्तया । अत्र कार्यकारणयोः अभेदापचाराद् इति कथनेन अभेदस्य आरोपितत्वं स्फुटमायाति। रत्नप्रभाकारः इममभिप्रायं विशदं प्राकाशयत्। तथा च 'तत्र भेदस्य उद्भूततत्वविवक्षया' अस्यार्थस्य अयं शब्दो वाचकः इत्यादिर्भेदेन व्यवहारः। 'तपरस्तत्कालस्य' इत्यादि पाणिनीयसूत्राणि 'तस्य वाचकः प्रवणः इत्यादीनि योगसूत्राणिचास्य पक्षस्य समर्थकानि। अभेदस्य उद्भूतत्वविवक्षया डित्थोऽयम्, ब्राह्मणोऽयम् श्यामोऽयमित्यादिव्यवहारः सार्थक्यमावहति। 'वृद्धिरादैच्' इत्यादीनिसूत्राणि च एनमेव पक्षं समर्थयन्ते।

**तादात्म्यस्वरूपसमीक्षायां मतान्तराणि-**

अभेदस्तादात्म्यमिति तादात्म्यस्य स्वरूपं न्यायदर्शने प्रोक्तमस्ति। तच्च स्वनिष्ठोऽसाधारणो धर्मस्तद्व्यक्तित्वादिरूपः। तथा चोक्तं व्युत्पत्तिवादे श्रीगदाधरभट्टेन 'स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टं यत्तदन्यत्वरूपं तादा-त्म्यम्' घटत्वादयःसर्वे धर्मा उक्तसम्बन्धद्वयेन भेदं विशिष्टा एव, तद्भिन्नं तद्व्यक्तित्वमेव। नीलो घटः इत्यादौ तद्व्यक्तित्वरूपतादात्म्यसम्बन्धेन नीलविशिष्टो घट इति बोध एतन्नये।

पूर्वमीमांसादर्शने वास्तवभेदाभेदघटितमेव तादात्म्यमङ्गीक्रियते। 'द्रव्यं घटः' इत्यत्र जात्यादिरूपधर्मेण भेदः व्यक्त्यात्मना विशेष्येण अभेदः इति अवच्छेदकभेदेन एकत्रैव वृक्षे कपिसंयोगतदभावयोः सत्त्वमिव न तयोर्विरोध इति सिद्धान्तितम्।

अभेद एव तादात्म्यमिति अद्वैतवेदान्तमतम्। 'सर्व खल्विदं ब्रह्म' इत्यादि श्रुत्या प्रपञ्चमात्रे ब्रह्मणोरभेदात्। प्रपञ्चे परस्परमपि अभेदो मन्तव्यः, तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात्। किन्तु अभेदोऽयं न आत्यन्तिकः नीलत्वघटत्वयोः भेदेन नीलघटयोस्तदसम्भवात्।

अतश्च भेदसमशीलोऽभेदस्तादात्म्यम्। अत एव च घटपटयोर्न तादात्म्यम्। तत्र पूर्वोक्तश्रुतिबलाद् अभेदो वास्तवः भेदस्तु आध्यासिक इति न तयोर्विरोधः। तदात्म्यमखण्डोपाधिरित्यपि अद्वैतवेदान्तसिद्धान्त।

**अत्र समीक्षात्मको निष्कर्षः -**

न्यायदर्शनसम्मतं तादात्म्यं युक्तिविरुद्धम् 'नीलोघटः' इत्यादौ नीलत्वघटत्व-योर्धर्मयोरभेदात्। मीमांसादर्शनाभिमतमपि तन्न समीचीनम्, कल्पनागौरवात्, श्रुतिविरोधाश्च। तस्माद् भेदसमानाधिकरणाभेदरूपमेव तात्पर्यं सिद्धान्ततया स्वीकृतम्। तत्र व्यवहारदशायां भेदो वास्तवः अभेद औपचारिकः। परमार्थदशायामभेदो वास्तवः, भेदस्तु काल्पनिक इतीयानधिको बोध्यः।

**मूले तादात्म्यस्य शक्तिनियामकसम्बन्धत्वं –**

वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि बौद्धं, तयोरभेदः। न च बौद्धे दाहादिशक्तिमत्त्वमित्यग्रे निरूपयिष्यामः। अतएव पुरावर्तिडित्थं पश्यतो नामजिज्ञासया 'कोऽयम्'? इति प्रश्ने 'डित्थोऽयम्' इत्युत्तरे सन्निहितदेशपिण्डमुद्दिश्य 'डित्थ' शब्द विधेयताप्रतीतिः सङ्गच्छते।

'अस्यायमर्थोऽस्यार्थस्येदं पदम्' इत्यादौ षष्ठ्यनुपपत्त्या तयोः स्वाभाविकयोगाङ्गीकाराच्च। असम्बद्धानां घटपटादीनामेवं व्यवहाराभावात्। 'अस्यायं वाचकः' इत्यादिव्यवहारोप्येवमेव 'अयं वाचकः एतत्सम्बन्धी' इत्यादि तदर्थात्। स्पष्टञ्चेदम् ''अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते। योगः शब्दार्थयोः'' इति हरिकारिकाव्याख्यावसरे हेलाराजीये। 'समयः' सङ्केतः इति चाप्तोपदेशवृद्धव्य-वहारपर्यायौ। अत एव न्यायभाष्यकृदादयः ''सामयिकः शब्दार्थप्रत्ययः '' इति सूत्रे कः पुनरयं समयः? अस्य शब्दस्येदमर्थजातमभिधेयम्' इति 'अस्येदं नामधेयम्' इत्यादि नियोगरूपः 'अस्माच्छब्दादयमर्थोबोद्धव्यः' इत्यादिनियोगश्च इत्याहुः। नियोगश्चा-प्तोपदेश एव। ''सामयिकः शब्दादर्थप्रत्ययः'' इति कणादसूत्रव्याख्यातृभिश्च 'नकुलंदष्ट्रास्पृष्टा या काचिदौषधिः सा सर्पविषहन्त्री' इत्याप्तोपदेशस्यैव समयत्वमुक्तम्। ''अयमयमितिनियोगोऽपि समयः'' इति पातञ्जलाः। उक्त ईश्वरसङ्केत एव शक्तिरिति तु न युक्तम् अयमेतच्छक्योऽत्रास्य शक्तिः इत्यस्य सङ्केतस्यानापत्तेः, ईदृशसङ्केतस्य लोके दर्शनेन तादृशेश्वरसङ्केतस्याव्यनुमानात्।

**अत्र कलाटीकावृतस्तु -**

एवमभ्युपेत्य समाहितम्। वस्तुतः दोषशङ्कैव नेत्याशयेन सिद्धान्तमाह-बुद्धिविषयावेवार्थशब्दौ वाच्यवाचकौ न तु वास्तवावित्यर्थः। अत एव – शब्दार्थयो-रभेदादेव। भेदस्य वास्तविकत्वमुपपादयति स्वाभाविकेति।

एतेन स्वरूपभेदादुपायभेदादर्थक्रियाभेदाच्च शब्दार्थयोरभेदो न युक्तः। तथाहिशब्दत्वसामान्यात्मकानि श्रोत्रग्राह्याणि अभिधेयप्रत्ययार्थक्रियाणि नामान्यनु-भूयन्ते। अर्थस्तु घटत्वादि सामान्यात्मकश्चक्षुरादीन्द्रियग्राह्यो मधुधारणप्रावरणाद्यर्थकारी चेति कुतोऽभेदः? 'डित्थोऽयमिति सामानाधिकरण्य व्यवहारोऽपि यो नानादेशकालसंप्लुतः सोऽयम् संन्निहितदेशकाल इत्यर्थक इति नाभेदसाधक इति 'अक्षक्रमम्वरान्त धृतेः'। इत्यधिकरणस्थं वाचस्पतिमिश्रोक्तमपास्तम्। अत्यन्ताभेदे एतद्दोषेऽपि भेदाभेदवा-दिनामभेदस्याऽऽध्यासिकत्वं वदतामदोषात्।

**रत्नप्रभाकारः**

शब्दार्थयोस्तादात्म्य आपतितदोषोद्धाराय भेदस्यारोपितत्वमुक्त्वा तत्त्वतोऽभेदेऽपि समाधिमाह- शब्दार्थौ द्विविधौ बौद्धौ बाह्यौ च। तत्र बौद्धार्थेन सह बौद्धशब्दस्य तादात्म्यम्। बौद्ध इत्यस्य बुद्धिरूपदेशस्थ इत्यर्थे न तु बुद्धिविषय इति। बाह्यस्यापि बुद्धिविषयत्वात्। डित्थोऽयमिति- 'अयम्' इत्यनेन सन्निहित देशस्थपिण्डस्य (डित्थस्य) ग्रहणम्। अत्राभेदेन प्रश्नोत्तरयोर्भेदेनोद्देश्यविधेयभावस्य च सङ्गतिः।

भेदमात्रस्य षष्ठीनिमित्तत्त्वे घटस्य 'पट' इति व्यवहारोऽप्यापद्येतेति भावः। योगः शब्दार्थयोः इति हरिकारिकाव्याख्यावसरे हेलाराजीये उक्तं - अस्यायं वाचको वाच्य इति षष्ठया प्रतीयते।

षष्ठ्यनुपपत्त्या शब्दार्थयो: स्वाभाविक: सम्बन्धोऽस्त्येव। स एव सम्बन्ध: 'गौरवम्' इत्यभेदेन व्यपदिश्यते असम्बद्धयो: सामानाधिकरण्यासम्भवादितिभाव:। वृद्धव्यवहारात् संकेतग्रह इति मतमसङ्गतमुभयो: पर्यायत्वात् अतएव वृद्धव्यवहार सङ्केतयो: पर्यायत्वादेव।

वैशेषिकदर्शनीयं सूत्रमिदम्, यदुपरिभाष्यं तन्न्यायदर्शनीयं सूत्रं तु 'सामयिकत्वाच्छब्दार्थ संप्रत्ययस्य ' इत्येवं रूपम्।

नियोगशब्दस्य विधौ प्रसिद्धत्वादाह- नियोगश्चेति। एतेन 'घट: शब्दवान्' घटोऽर्थ:' इति प्रयोगाभावेन शब्दार्थयो: सम्बन्धाभावादनियतबोधापत्तिरित्यपास्तम्। संकेतरूपस्य नियामकस्य सत्त्वात्।

**शब्दतदर्थयो: तादात्म्यमेव शक्ति: -**

न च भेदसमानाधिकरणा अभेदरूपस्य तस्य सम्बन्धत्वं न सम्भवति वृत्तित्वानियामकत्वाद् इति वाच्यम्, सम्बन्धित्वनियामकत्वेनापि अस्य सम्बन्धत्वस्वीकारे क्षतिराहित्यात् स्वस्वामिभावादिसम्बन्धवत्। 'वृद्धिरादैच्' इत्यादौ समानविभक्तिकप्रयोग-स्यैव तदीयसम्बन्धत्वे प्रमाणाच्च। द्वित्वविशिष्टत्वरूपं द्विष्ठत्वमपि उपपादयितुं शक्यम्। तथा हि स्वसामानाधिकरण्यस्वाश्रयाश्रयवृत्तित्वान्यतरसम्बन्धेन द्वित्वस्य वैशिष्ट्यं गृहीत्वा तादात्म्यस्य सम्बन्धत्वं सम्मान्यं दार्शनिकै:। यत्तु वाच्ये वाचकभावरूपा एव मुख्या शक्ति: तादात्म्ये तु तद्द्योतकतया आरोपितं शक्तित्वमिति मन्जूषाकृन्मतम्, तन्न समीचीनम्, मुख्यत्वसम्भवे आरोपितत्वस्वीकारस्य अनौचित्यात् वाच्यवाचकभावे अन्योऽन्याश्रयदोषप्रसङ्गाच्च, अनादित्वविशेषणेनैव तत्परिहारस्य गौरवाक्रान्तत्वाच्च। तद्रीत्या अस्यापि वृत्तित्वानियामकत्वेन सम्बन्धत्वस्यैव असम्भवाच्च।

तादात्म्यघटकस्य भेदाऽभेदान्यतरस्य उद्भूतत्वेन उत्पद्यमानो य: 'अस्येदं नामधेयम्' 'सोऽयम्' इत्यादिव्यवहार:, तस्य तादात्म्यपक्षेणैव समर्थनाच्च। योग्यतालक्षण: सम्बन्ध: इति पक्षेऽपि तादात्म्ययोग्यता इत्यर्थ: एतदेकवाक्यतयाम-कर्तव्य:। अत एव श्रीहरिवृषभेण स्वोज्ञपवृत्तौ स्फुटमुक्तम् - यथेद्रियं प्रकाशकं, विषय: प्रकाश्य: तद्वत् य: शब्द: प्रकाशक: यश्चार्थ: तस्य प्रकाश्य: तत्र द्वयो: प्रकाश्यप्रकाशयकभावेन तादात्म्ययोग्यतानुमिति: कर्तव्या । तद्यपि बोधजनकत्वरूप-योग्यताऽपि पक्षान्तरं, तच्चापि न प्रामाणसहम्। लघुमञ्जूषायाम् आत्माश्रयादि-दोषोद्भावनेन तस्य निराकृतत्वात्। एतेन शब्दे बोधजननसामर्थ्यमेव शक्ति: इत्यपि पक्षान्तरं निराकृतप्रायम्। शक्तेरपि कार्यजनेन सम्बन्धस्यैव नियामकत्वात् दीपगतप्रकाशकत्वासामर्थ्यस्य सत्त्वेपि घटादिप्रकाशने संयोग एव नियामक: उक्तञ्च श्रीहरिणा-

**उपकार: स यत्रास्ति धर्मस्तत्रानुगम्यते।**
**शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुण: ।। इति।**

**तादात्म्यस्य शक्तित्वे अग्न्यादिशब्दोच्चारणेन कथं न मुखदाह: -**

ननु पदपदार्थयो: तादात्म्ये स्वीकृते अग्न्यादिशब्दोच्चारणे मुखं दग्धं भवितुमर्हति, मधुशब्दोच्चारणे माधुर्यानुभूतिश्च स्यात् इति चेत् उच्यते- आरोपिताभेदघटितस्यैव शब्दार्थयोस्तदात्म्यस्य अभ्युपगमेनोक्तशङ्कानिरासात्। न हि आरोपिताभेदेन एकस्य सम्बन्धिन: कार्यमपरेण सम्बन्धिना कर्तुं शक्येत। शाब्दिकदर्शने बौद्ध एव अर्थ: शक्य:, बौद्ध एव शब्द: शक्त इतिसिद्धान्ताभ्युपगमाच्च। न हि बौद्धे पदार्थे दाहादिसामर्थ्यम-नुभूयते। अन्ये च कारणतावच्छेदकसंयोग-सम्बन्धेनैव अग्ने: काष्ठदाहकत्वं दृष्टम्। प्रकृते बाह्यपदार्थपक्षेऽपि तत्सम्बन्धाभावेन न दाहप्रसङ्ग इति सर्व समञ्जसम्।

''अस्यायं वाचको वाच्य:'' इति षष्ठ्या हरिकारिका व्याख्यावसरे हेलाराजीये उक्तमस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते। योग: शब्दार्थयोस्तत्त्वमप्यतो व्यपदिश्यतै।

**संज्ञासंज्ञिभावसम्बन्धविमर्श: -**

उक्तं वाच्यवाचकभावसम्बन्धमेव केचन आचार्या: संज्ञासंज्ञिभावपदेन, प्रत्याय्यप्रत्यायकभावपदेन नामनामिभावपदेन वा व्यवहरन्ति। तत्र संज्ञा = वाचकशब्द:, संज्ञे = वाच्योऽर्थ:, तयोर्य: सम्बन्ध स तु लोके पदपदार्थोभयवृत्ति:। यथा 'अयं देवदत्त:' इति व्यवहारे अस्य मांसपिण्डस्य संज्ञिन: 'देवदत्त' इति संज्ञा। किन्तु व्याकरणदर्शने पदमात्रवृत्तित्वेनापि अयं सम्बन्धो व्यवहृतोऽस्ति। तथा हि 'वृद्धिरादैच्' अदेङ्गुण इति आदिमे सूत्रद्वये महामुनिपाणिनिना अस्यैव सम्बन्धस्योपादानङ्कृतम्। तत्र वृद्धिरिति संज्ञा, आदैच: संज्ञिन: गुण इतिसंज्ञा, अदेङ् संज्ञिन:। वाच्यावाचकभावरूपस्यास्य संज्ञासंज्ञिसम्बन्धस्य द्योतकतया तादात्म्यसम्बन्ध: स्वीकृतो मन्जूषाकृता। एवञ्च तत्र तादात्म्यस्यापि शक्तित्वेन व्यवहार: कृतोऽस्ति।

**एकस्मिन् शब्दे अनेकार्थनिरूपितम् एकं तादात्म्यमनेकं वा?**

एकशब्दे नानार्थनिरूपितं तादात्म्यमेकम् अनेकं वेत्येतद्विषये त्रय: पक्षा वर्तन्ते। तथा हि अर्थभेदात् तादात्म्यभेद: शब्दभेदश्च इत्येक: पक्ष:। अर्थ भेदेऽपि तादात्म्यभेद: शब्दैक्यञ्च इति द्वितीय: पक्ष:। अर्थभेदसत्वेऽपि तादात्म्यस्य शब्दस्य चैक्यमेवेति तृतीय: पक्ष:। 'हलोऽनन्तरा: संयोग:' इति सूत्रे भाष्यकृता इमे त्रयोऽपि पक्षा सङ्केतिता: सन्ति। तथा हि तत्र ग्रामशब्दोऽयं बह्वर्थ: इत्युक्त्या अर्थभेदेऽपि शब्दैक्यमेवेत्यायाति। अत्र पक्षे तादात्म्यरूपा शक्तिराश्रयस्य शब्दस्य ऐक्येन एका, एकताम्रफले रूपरसगन्धादी-नामनेकेषाम् एकतादात्म्यवत्। 'निरूपकस्यार्थस्य भेदाद्भिन्नान्येव तादात्म्यानि' इत्यपि एक: सिद्धान्त:। अन्यत्र च 'तद् य: सारण्यके ससीमके सस्थण्डलिके वर्तते' इत्युक्त्या अर्थभेदाच्छब्दे भेद: स्पष्टतया प्रतिभाति। अस्मिन् पक्षे तु तादात्म्यभेद एव, निरूपकाश्रययोरुभयोरपि भेदात्। एवञ्च अर्थभेदस्तादात्म्यभेद: शब्दभेद, इत्येक: पक्ष: अर्थभेदस्तादात्म्यभेद: शब्दैक्यमिति द्वितीय: पक्ष:। अर्थभेदस्तादात्म्यैक्यं शब्दैक्यमिति तृतीय: पक्ष:। अत्र च आद्यौ पक्षौ गौरवग्रस्तावत: लाघवात् अन्तिमस्तृतीय एव पक्ष: सिद्धान्तत्वेन स्वीकरणीय:।

कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्गय: शब्दब्रह्मरूपस्फोटव्यञ्जकश्च। तादृशमध्यमानादव्यङ्गय: शब्दब्रह्मरूपस्फोट-व्यञ्जकश्च। तादृशमध्यमानादव्यङ्गय: शब्द: स्फोटात्मको ब्रह्मरूपो नित्यश्च।

**तादात्म्यस्वरूप निरूपणप्रसङ्गे पक्षत्रयम् -**

एक शब्दे नानार्थनिरूपितं तादात्म्यमेकम् अनेकं वेत्येतद्विषये त्रय: पक्षा वर्तन्ते। तथा हि अर्थभेदात् तादात्म्यभेद: शब्दभेदश्च इत्येक: पक्ष:। अर्थभेदेऽपि तादात्म्यभेद: शब्दैक्यञ्च इति द्वितीय: पक्ष:। अर्थभेदसत्वेऽपि तादात्म्यस्य शब्दस्य चैक्यमेवेति तृतीय: पक्ष:। 'हलोऽनन्तरा: संयोग:' इति सूत्रे भाष्यकृता इमे त्रयोऽपि पक्ष: सङ्केतिता: सन्ति। तथा हि तत्र ग्रामशब्दोऽयं बह्वर्थ: इत्युक्त्या अर्थभेदेऽपि शब्दैक्यमेवत्यायाति। अत्र पक्षे तादात्म्यरूपा शक्तिराश्रयस्य शब्दस्यऐक्येन एका, एकताम्रफले रूपरसग्रन्धादी-नाममुनेकेषाम् एकतादात्म्यवत्। 'निरूपकस्यार्थस्य भेदाद्भिन्नान्येन तादात्म्यानि' इत्यपि एक: सिद्धान्त:। अन्यत्र च 'तद् य: सारण्यके ससीमके सस्थण्डलिके वर्तते' इत्युक्त्या अर्थभेदाच्छब्दे भेद: स्पष्टतया प्रतिभाति। अस्मिन् पक्षे तु तादातम्यभेद एव, निरूपकाश्रययोरुभयोरपि भेदात्। एवञ्च अर्थभेदस्तादात्म्यभेद: शब्दभेद, इत्येक: पक्ष: अर्थभेदसतादात्म्यभेद: शब्दैक्यमिति द्वितीय पक्ष:। अर्थभेदस्तादात्म्यैक्यं शब्दैक्यमिति तृतीयपक्ष:। अत्र च आद्यौ पक्षौ गौरवग्रस्तावत: लाघवात् अन्तिमस्तृतीय एव पक्ष: सिद्धान्तत्वेन स्वीकरणीय:। किञ्च 'प्रत्यर्थं शब्दाभिनिवेश:, किमिदं प्रत्यर्थमिति? अर्थमर्थं प्रतिप्रत्यर्थम्, शब्दनिवेशात्' इति।

भाष्योक्त्या अर्थभेदेन शब्दभेद: समक्षमामायाति एवमेव 'यद्यपि ह्यर्थावर्थौ प्रति तदपि प्रत्ययर्थमेवपदपि अर्थान् प्रति तदपि प्रत्यर्थमेव' इति भगवदुक्त्या च अर्थभेदेऽपि न शब्दभेद इति पक्ष: स्फुटं दृष्टिपथमाकर्षति। तादात्म्यस्य भेदाभेदौ तु पूर्ववदेव बोधविषयतामावहत:। सरूपाणाम् -

**उभयो: टीकयो: साम्यं वैषम्यं च :-**

कलाटीकाकारेण तादात्म्यं विषये उक्तम् -

सर्ववत्ताबुद्धिप्रसङ्ग:, तथा च शक्तिनानात्वमेवेति।

रत्नप्रभाकार: अपि आम्रफलमाध्यमेन रूपादीनां भिन्नं भिन्नं तादात्म्यं तथैकस्मिन्नेव शब्देऽर्थभेदाद् भिन्नानि तादात्म्यानि स्वीकरोति। 'हलोऽनन्तरा: संयोग:' इति 'सरूपाणामेव एकशेष:' च सूत्रे पक्षत्रयं सूचितमस्ति इति उभयटीकाकारौ स्वीकुर्वत:।

''सरूपाणाम्'' इति सूत्रेऽपि भाष्ये स्फुटमिदं पक्षत्रयम्। ''प्रत्यर्थं शब्दाभिनिवेश:, किमिदं प्रत्यर्थमिति? अर्थमर्थं प्रति प्रत्यर्थम्, शब्दनिवेशात् अनयोक्त्यां अर्थभेदेन शब्दभेद:, स्फटमायाति। पुनरग्रे भाष्ये 'यदपि ह्यर्थावर्थौ प्रति तदपि प्रत्यर्थमेव, यदपि अर्थानर्थान् प्रति तदपि प्रत्यर्थमेव' इत्यभिधानेन अर्थभेदेऽपि न शब्दभेद इत्यागच्छति।

**वैयाकरणमतेन ईश्वरसङ्केतस्य शक्तित्वाभाव:**

पुनर्नैयायिकमतं दूषयति - उक्त: प्राग्विवेचित: पदविशेष्यकोऽर्थविशेष्यको वा ईश्वरसङ्केत:। ईश्वरेच्छा एव शक्ति: (शब्दस्यार्थाबोधकत्वव्यापार:) इति नैयायिकमतं नैव युक्तम्। तत्र हेतुमाह - 'अयमेतच्छक्य:' 'अत्रास्य शक्ति:' इत्यस्य सङ्केतस्य शक्ति: पार्थक्येन प्रसिद्धत्वात्। अर्थात् भेद एव षष्ठीविधानात् सङ्केतस्य शक्तिबोधकत्वेन शक्तिस्वरूपत्वाभावात्। उक्तार्थे शिष्टं प्रमाणयति- न्यायसूत्रस्य वाचस्पतिटीकायामुक्त - ''सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृत: सङ्केतस्तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केत:' इति। अर्थात् सर्गस्य सृष्टेरादौ प्रारम्भकाले भवन्ति तच्छीला या इति तांस्ताम्। महर्षयो देवताश्च तासाम्। जगत्प्रणेत्रा प्रत्यक्षमेव अर्थसंसूचनम् विहितम्। तेषां महर्षिणां प्रयोगदर्शनात्। अस्मत्प्रभृतीनाम् च तस्येश्वरस्य सङ्केत: व्यवहार विषय। तथा च योगवाचस्पत्ये उक्तम् - ''सर्वे च शब्दा: सर्वार्थाभिधानसमर्था: इति सर्वैरर्थै: सर्वेषां शब्दानां सम्बन्ध: ईश्वरसंकेतस्तु प्रकाशक:।'' अर्थात् ''सर्वे च शब्दा: सर्वार्थाभिधानसम-र्था इति सर्वैरर्थै: सर्वेषां शब्दानां सम्बन्ध: ईश्वरसङ्केतस्तु प्रकाशक: इति प्रतिपादितमस्ति।

अत एव शक्तेर्नित्यत्वेन संकेतस्य तत्प्रकाशकत्वादेवेत्यर्थ: - ''नित्य: शब्दार्थसम्बन्ध'' इति-

**''नित्या: शब्दार्थसम्बन्धा: समाम्नाता: महर्षिभि:।**

**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभि:।। '**

इति वाक्यपदीयस्था पूर्णकारिका।

नन्वेवं सर्वशब्देन सर्वार्थबोध इत्यत तथा च ज्ञातस्यैव सम्बन्धस्य बोधकत्वेनास्मदादीनां ज्ञानाभावान्न बोध इति भवा:। ''नामरूपे व्याकरवाणि' इति श्रुत्या शब्दार्थयोर्ब्रह्मोपादानकत्वेनोभयरूपत्वम्। ननु परा वाग्रूपेति वक्ष्यते, तस्या योगबलेन प्रत्यक्षे तत्काग्र्ये भूतानां शब्दानां प्रत्यक्षत्वेऽव्यर्थाप्रत्यक्षत्वेन सम्बन्धिद्वय ज्ञानाभावात् कथं सम्बन्धप्रत्यक्षं तेषामत आह - स्फोटात्मकब्रह्मण एव शब्दात्मकमर्थात्मकञ्च जगत् कार्यम्। एवञ्च तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन शब्दाभिन्ना परा वाक्, तदभिन्नोऽर्थ इति शब्दार्थयोरव्यभेद:। तथा चैकस्य प्रत्यक्षे उभयोरपि प्रत्यक्षत्वात् सम्बन्धस्यापि प्रत्यक्षत्वं योगिनाम्। तत्र प्रमाणमाह-

**''क्रियाशक्तिप्रधानाया: शब्दशब्दार्थकारणम्।**

**प्रकृतेर्विन्दुरूपिण्या: शब्दब्रह्माभवत् परा।।**

अर्थात् -

शब्दशब्दार्थकारणं पराक्रमं शब्दब्रह्मक्रियाशक्तिप्रधानाया: विन्दुरूपिणया: प्रकृते: साङ्खयप्रसिद्धाया गुणत्रयात्मिकाया अभवत्। ननु विन्दुत: परावाग्रूपस्फोटात्मकस्य ब्रह्मण उत्पत्तिस्वीकारे-ऽनित्यत्वापत्तिरत आह- नित्यत्वं तु यावत्सृष्टिस्थित्या व्यवहारनित्यतया च बोध्यम्। अर्थात् सर्गादावुत्पद्य प्रलयकालं यावत् स्थित्या 'घटादिवन्मध्ये नाशाभावेन सापेक्षमस्य' नित्यतवमिति भाव:।

तत्र श्रुतिमपि प्रमाणयति-

**''सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम्।**

**तामन्ये विदुरन्यामिव च नानारूपामात्मनि:सन्निविष्टाम्।**

अर्थात् अर्थेन न प्रविभक्तं भिन्नं तत्त्वं स्वरूपं यस्यास्ताम्। स्फोटरूपैकेव वागुपाधिभेदाद् भिद्यतेऽत आह- एकामिति। अभिष्यन्दमानाम् = शब्दार्थविशेषरूपेणा-भिव्यज्यमानाम्। अन्ये तामेकामन्यामिव = भिन्नरूपामिव। अस्यैवार्थ: 'नानारूपाम्' इति। अन्त:करणे शब्दार्थयोर्बुद्धिस्थत्वं दर्शितम्। सा वाक् चतुर्विधा परा, पश्यन्ती, मध्यमा, वैखरी च। अत्रोत्तरोत्तरं स्थूलत्वं बोध्यम्। स्थूलक्रमेण तत्स्वरूपमाह -

**''प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति।**

**स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।।''**

अर्थात् सर्वेषां प्राणिनां प्राणापानवाय्योरन्तरे मध्ये वाग्रूपा देवी नित्यं तिष्ठति स्म।

**''वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धिनी।**

**केवलं बुद्धयुपादानक्रमरूपानुपातिनी।।**

अर्थात् पयोक्तृणां प्राणवृत्तिनिबन्धिनी प्राणव्यापाराभिव्यक्ता सैव वाक् स्थानेषु कण्ठादिषु वायौ विवृते विवर्तरूपतां प्राप्ते सति कृतवर्णपरिग्रहा ककारादिवर्णरूपा परश्रवणग्राह्या वैखरीत्युच्यते। तदुक्तम्- ''प्राणेनाप्यायिना सेयं व्यवहारनिबन्धिनी'' इति।

**''प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवत्र्तते।**

**अविभागा तु पश्यन्ती सर्वत: संहृतक्रमा।।**

अर्थात् प्राणवायुवृत्तिं व्यापारमनुसृत्य तत्तच्छब्दविशेषतत्तदर्शविशेषोल्लेखिन्या बुद्धया विषयीकृता परश्रवणग्रहणयोग्या सूक्ष्मा मध्यमा वागुच्यते। सूक्ष्मत्वं वैखरीमपेक्ष्य। कार्यकारणविभागरहिता वर्णक्रमरहिता योगिनां समाधौ सविकल्पकज्ञानविषय: पश्यन्ती-त्युच्यते। मूलाधारे उक्तरीत्या सूक्ष्मतया नित्यापरा वागभिधीयते।

तदाह -

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**

**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।। इति।**

**वैखर्या हि कृतो नाद: परश्रवणगोचर:।**

**मध्यमया कृतो नाद: स्फोट व्यञ्जक उच्यते।। इति।**

अर्थात् मध्यमानादोऽर्थ वाचक: युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र सकलजनश्रोत्रग्राह्यो भेर्यादिनादवन्निरर्थक:। मध्यमानादश्च सूक्ष्मतर: कर्णपिधाने जपादौ च सूक्ष्मतर वायुव्यङ्गय: शब्दब्रह्मरूपस्फोटव्यञ्जकश्च। तादृशमध्यमानादव्यङ्गय: शब्द: स्फोटात्मको ब्रह्मरूपो नित्यश्च।

**अपभ्रंशेऽपि शक्तिसत्त्वविमर्शः-**

**नैयायिकाः मतविमर्शः**

तार्किका हि अपभ्रंशशब्देषु व्युत्पन्नानां साधुशब्दस्मरणादव्युत्पन्नानां तु शक्तिभ्रमाद् बोधः किन्तु न तत्र शक्तिरिति यदाहु। मञ्जूषाकारः 'असाधुशब्देन साधुस्मरणद्वाराऽर्थ बोध इत्याह। अर्थात् न्यायदर्शने तु अपभ्रंशानामनादित्वाभावेन साधुशब्दानामिव अनादित्वेन साधुशब्देष्वेव वाचकत्वं व्यवस्थाप्यते। उक्तञ्च न्यायमञ्जर्या श्रीमता जयन्तभट्टेन स्वाध्यायाध्ययनसमये यादृशमेव शब्दं यथोचितमात्रानुस्वार-स्वरादिरूपसमुत्थितमुच्चारयति आचार्यः तादृशमेव शिष्यः प्रत्युच्चारयति। सोऽपि शिष्यो यदा गुरुर्भविष्यति तदा स्वं शिष्यं तथैव शिक्षिष्यति। आचार्यो यदा शैशवे शिष्यः आसीत् तदा अन्येन गुरुणा शिक्षितोऽभूत, सोऽपि तदन्येन सोऽपि तदन्येन इत्येवमनादित्वम्। इत्थमेव यदि गाव्यादीनां गवादिवत् प्रमादेन सम्यक् तया प्रयोगः परिरक्ष्यते तथैव तेभ्यो अर्थप्रतिपत्तिः क्रियते तदा अनादि गवादि शब्द समानविषया एव गव्यादयः स्युः। न चैवमस्तु, इति शक्यमभ्यनुज्ञातम्। इदानीमेव पश्यताम्, तेषां प्रत्यक्षत उपलब्धेः, तस्माद् अवश्यं तावदद्यत्वे गाव्यादयः प्रकारान्तरोपपत्तिसम्भावनाङ्कुरप्रभवाः सन्तु न गवादि शब्दसमानविधित्वम्, अध्यवसातुं शक्नुवन्ति।

**अत्र कलाटीकाकारस्तु** –

नैयायिकाः व्युत्पन्नानां साधुस्मरणात् बोधः, अव्युत्पन्नानां शक्तिभ्रमाद्बोध, इति न तेषु शक्ति कल्पना' इति।

**अत्र रत्नप्रभाकारस्तु -**

व्युत्पन्नानामपभ्रंशेन साधुशब्दस्मरणादव्युत्पन्नानाञ्च तेन शक्तिभ्रमाद् बोध सिद्धेः नापभ्रंशेषु शक्तिरिति। अत्र उभयटीकाकारौ असाधुशब्देन साधुशब्दस्मरणं भवति ततो भवत्यर्थबोधो न त्वपशब्दे शक्तिरिति कथयतः।

अतः नैयायिका हि साधुशब्देष्वेवार्थाभिधान शक्तिं समर्थयन्ति। तदनुसारेण व्युत्पन्नानां हि अव्युत्पन्नोच्चारितेऽशब्दे तद्वाचकसाधुशब्दस्मरणेनैव ज्ञानं भवति अव्युत्पन्नानां तु तत्रैव शक्तिभ्रान्त्याऽशब्देभ्योऽर्थज्ञानं भवति।

**वैयाकरणमतविमर्शः**

वैयाकरणास्तन्न मन्यन्ते। तन्मते तु साधवोऽसाधवश्च शब्दाः साक्षादेव वाचकाः। अर्थसंशये यथास्थिति यथा पात्रमुभयेनैवा-र्थनिर्णयः। यत्र हि असाधुशब्दानां परम्परा-तप्रचलनं तत्र नैव तस्य साधुशब्दो वाचकोऽपितु अपशब्द एव। तदेवाऽऽह हरिरपि-

**''पारम्पर्यादपभ्रंशा निर्गुणेष्वभिधातृषु।**
**प्रसिद्धिमागता ये तु तेषां साधुरवाचकः।।**
**दैवी वागवकीर्णेयमशक्तैरभिधातृभिः।**
**अनित्यदर्शिना त्वस्मिन् वादे बुद्धिविपर्ययः।।**

कौण्डभट्टेनापि विविधयुक्तिभिः पक्षोऽयं सुष्ठुतया समर्थितः। यथा 'अपभ्रंशानाम-शक्तत्वे ततो बोध एव न स्यात्, न च साधुस्मरणात् ततो बोधः तेन विदुषां पामराणामपि बोधात्। न च शक्तिभ्रमात् तेभ्यो बोधः, बोधकत्वस्य बाधेन शक्तिग्रहस्याभ्रमत्वात्। किञ्च विनिगमनाविरहाद् भाषाशब्देष्वपि शक्तिरावश्यको। न हि तेषु नानात्वं प्रतिबन्धकं कल्पयितुं शक्यम्। संस्कृतवद् महाराष्ट्रादिभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमाविरहतादवस्थ्यात्।

नागेशभट्टमहोदया अपि पक्षमिमं विविधप्रमाणैः सिद्धान्तितवन्तः पक्षान्तरञ्च निराकृतवन्तः।

**मञ्जूषायां नागेशमतम् -**

सा च शक्ति: साधुष्विवापभ्रंशेष्वपि शक्तिग्राहकशिरोमणे: व्यवहारस्य तुल्यत्वात्। व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम्। कलाटीकाकृतस्तु नैयायिका: ''व्युत्प-न्नानां साधुस्मरणात् बोधो, अव्युत्पन्नानां शक्तिभ्रमाद्बोध, इति न तेषु शक्ति कल्पना'' इति। तत्राद्यपक्षं खण्डयति न चेति। वैयाकरणस्यापादमावश्यकमिति सूचयितुमाह - ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतव:। यद्यपि 'हेतव' इत्यग्रे -

**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशका:।**

**न शिष्टैरनुगम्यन्ते पर्याया इव साधव:।।**

**न यत: स्मृतिशास्त्रेण तस्मात्साक्षादवाचका:।।**

अग्रेऽम्बाम्बेति हरिग्रन्थे दृश्यते तथाप्यनुपयुक्तत्वादत्रानुल्लेख:।

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंश: प्रयुज्यते।**

**तेन साधुव्यवहित: कश्चिदर्थोऽभिधीयते।।**

इत्यस्य निश्चय इत्यस्मादग्रिमस्येव विवक्षितार्थस्य तावतैव लाभादिति भाव:।

उक्तप्रसङ्गे रत्नप्रभाकारोक्त: अनेनारुचि: सूचिता, बालादीनां प्रवृत्ताविष्टसाधनत्व-प्रकारकज्ञानस्यैव प्रयोजकत्वेन जन्मान्तरानुभवजन्योद्बुद्धसंस्कारजन्येष्टसाधनत्वप्रकारक-ज्ञानेनैव प्रवृत्त्युपपत्तौ पदादिनिष्ठशक्तिस्मरणस्यानुपयोगात्।

अत्र तार्किका: - ''व्युत्पन्नानामपभ्रंशेन साधुशब्दस्मरणादव्युत्पन्नानाञ्च तेन शक्ति-भ्रमाद् बोधसिद्धेर्नापभ्रंशेषु शक्तिरिति। तत्राद्यं प्रथमं निराकरोति- ते = अपभ्रंशा:। साधु-ष्विति सप्तम्यर्थो विषयत्वम्। तथा चापभ्रंशा: साधुविषयकस्मरणद्वारा प्रत्ययोत्पत्तिहेतव: भवन्तीत्यर्थ:।

अम्बाऽम्बेतीति विषये आह हरिरपि -

**अम्बाम्बेति यदा बाल: शिक्ष्यमाण: प्रभाषते।**

**अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चय:।।**

अर्थात् 'अम्बा अम्बा' इति साध्वानुपूर्वी शिक्ष्यमाणो बालो यदा अव्यक्तं प्रभाषते इत्यादि रूपेण अम्बाडम्बेति पाठेऽन्वय:। म्बाम्बाम्बेति पाठे तु वक्ष्यमाणरीत्यान्वय:। यदा शिक्ष्यमाण: शिक्षां प्राप्यमाण: बाल: 'म्बा म्बाम्बा' इत्यव्यक्तं भाषते तदा तेनाव्यक्तेन साधुशब्दविषयकज्ञाने शाब्दबोधनिश्चयो भवतीत्यर्थ:।

अपशब्दे पामराणां बोधजनकत्वप्रकारकनिश्चयात्मकज्ञानविषयताया: सत्त्वेन बोधजनकत्वाभावरूपबाधज्ञानासम्भवेनेति भाव: तदभाववत्ताज्ञानम्प्रति, तद्वत्तानिश्चयस्य प्रतिबन्धकत्वात्।

यस्य 'घटपदं घटत्वावच्छिन्ननिरूपितशक्तिमत्' इति ज्ञानं विद्यते तस्य यथाक-थञ्चिद 'गगरी' पदम् 'घटत्वावच्छिन्ननिरूपित-शक्तिमत्' इति भ्रमो जातस्तदनन्तरम् 'गगरी' पदं घटत्वावच्छिन्ने शक्तम्' इति पामराणां ज्ञानपरम्परा जातेति प्राथमिक-ज्ञानगतभ्रमत्वमादायैव साजात्यादुत्तरोत्तरस्मिन् भ्रमत्वव्यवहार इति भाव:।

**अयम्भाव: -**

प्रयोजकवृद्धेन 'घटम्' इति प्रयोक्तव्ये 'गगरीम्' इति प्रयुक्ते साधुशब्दं जानत: प्रयोज्यस्य गगरीमित्यपभ्रंशेन स्मृतेन 'घटम्' इति साधुशब्देन बोधो जात:। परन्तु व्यवहारं पश्यता शक्तिं जिज्ञासुना तटस्थेन बालेन 'गगरी' शब्दश्रवणोत्तरं घटानयने प्रवर्तकमानं तमुपलभ्यस्मृतेन घटपदेन तद्बोधमजानता 'गगरी' पदमेव घटत्वावच्छिन्न-निरूपितशक्तिमत्त्वेन ज्ञातमिति तन्मते 'गगरी' इत्यस्यैव शक्तताऽवच्छेदकत्वेन ज्ञाततया तदभावयति तत्प्रकारकज्ञानस्यावरणाद् भ्रमत्वं सूपपादम्। तज्ज्ञानस्य भ्रमत्वेऽन्येषामपि तादृशज्ञानस्य भ्रमत्वम्। तदुक्तं हरिणा -

‘‘तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशका: इति। इव शब्देन तदुपगमस्य भ्रमत्वं सूचितम्। तादात्म्यस्य शक्तित्वञ्च स्पष्टमेवोक्तम्।

अपभ्रंशे शक्तिभ्रमे जैमिनिसम्मतिमाह -‘‘तदशक्तिश्चानुरूपत्वात्’’

तेषामपभ्रंशानां न शक्ति: किन्तु शक्तिभ्रम: अनुरूपत्वात्, गोरूपार्थबोधनाय प्रयोगस्तु गाव्यादे:। नन्विदं सूत्रमर्थान्तरपरत्वेनापि व्याख्यातुं शक्यं व्याख्यास्यते चार्थान्तरपरत्वेनैवात आह - तद्भाष्येति- मीमांसासूत्र भाष्यकृता शबरस्वामिना मदुक्तरीत्यैव व्याख्याय शक्तिभ्रम एवापभ्रंशेषु दर्शित इत्यर्थ:। नागेशेन अत एव स्त्रीशूद्रबालानां प्रयुक्ते साधौ अर्थसंशये तदपभ्रंशेन निर्णय:। अर्थात् अपभ्रंशानां शक्तत्वादेवेत्यर्थ:। उच्चारिते साधुशब्दे स्त्रीशूद्रबालानाम् इत्यस्य अर्थ संशये इति। अत: शक्तत्वेनोक्तसंस्कृतशब्दाज्ञानात्तदपभ्रंशेन निर्णय इत्यर्थ:।

**उभयो: टीकयो: साम्यं वैषम्यं च -**

अत्र उभयो: टीकयो: साम्यं मन्यते। यतो अपभ्रंशशब्दानां वाचकत्वं तस्मात् हि अर्थस्याभिधेयस्य अवगतौ ज्ञाने तुल्यायाम् साधुशब्दै: अपभ्रंशशब्दै: च व्याकरणादिना धर्मविषयकनियम: इति।

**एतद्विषये वैशेषिकदर्शनसंवाद-**

‘‘सामयिक: शब्दादर्थप्रत्यय:’’ इति सूत्रयता महर्षिकणादेन शब्दापशब्दयोस्तुल्यं सामयिकत्वङ्गीकृतमस्ति, सामयिकत्वं चात्र समय(सङ्केत)गृहीतसम्बन्धजन्यत्वम्’ इति मञ्जूषाकारो व्याख्यात्।

**उक्तविषये मीमांसादर्शनविमति: -**

पूर्वमीमांसका अपि अपभ्रंशे शक्तिं नाङ्गीकुर्वन्ति। अशक्त्या असामर्थ्येन साधूनामेव तथोच्चारणमर्थतोऽवमवतश्चानुरूपत्वादित्यर्थकं ‘‘तदशक्तिश्चानुरूपत्वात्’’ इति जैमिनिसूत्रं तत्र प्रमाणमस्ति।

भाष्यकृता श्रीशबरस्वामिनाऽपि ‘प्रतीयते हि गाव्यादिभ्य: सास्नादिमानर्थ: तस्मादितो वर्षशतेऽप्यस्य सम्बन्धोऽर्थेन सह आसीदेव, तत: परेण, तत: परतरेणेत्येवम-पशब्दानामप्यनादित्वम्, ‘हस्त: कर: पाणि:’ इतिवत् साधुत्वं चाशङ्कय ‘अन्यायश्चानेक-शब्दत्वम्’ इति सूत्रेण न चैष न्यायो यत्सृदशा: शब्दा एकमर्थमभि-निविशमाना: सर्वे विच्छिन्नपारम्पर्य्या एव’’इत्यर्थकेन समाहितम्। ततोऽर्थावबोधस्तु सादृश्यात् साधुशब्देऽवगते सति सम्भविष्यति। ‘हस्त:कर:’ इत्यादीनां पर्यायाणां त्वभियुक्तोपदेशात् सर्वेषामर्थेन सम्बन्धोऽनादिरिति विनिगमकाभावात् समेषां साधुत्वमिति च व्याख्यायते।

‘‘शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम्’ इति सूत्रेऽपि शबरस्वामिना अपराधात् प्रवृत्ता गाव्यादयो न नियोगतो विच्छिन्नपारम्पर्या:’ इति स्फुटमुक्तम्। तस्मात् शब्दानामेवानादित्वं साधुत्वं च नापशब्दानामिति मीमांसाराद्धान्तश्चकास्ति।

**अत्र काव्यप्रकाशसंवाद: -**

काव्यप्रकाशकृन्मतेऽपि अपभ्रंशे स्वारसिकी शक्तिरस्त्येव, अन्यथा शक्यसम्बन्धादि रूपलक्षणाऽपि तत्र कथं सिध्येत्? किञ्च, लक्ष्यस्य व्यञ्जकतायाम् ‘साहेन्ती’ इत्याद्युदाहरणदानमपि कथं सङ्गच्छेत्?

**उक्तविषये निष्कर्ष:**

नि:संशयमपभ्रंशेष्वपि शक्तिरस्त्येव आनुपूर्व्यवच्छेदेन, यथा साधुशब्देशक्ति: तथैवानुपूर्व्याः सत्त्वे को नाम समर्थो यदपभ्रंशेषु शक्तिमवहेलयेत्।

यदप्युच्यतेऽधुनैव केचचिन्नूतनमपभ्रष्टम्, तत्रापि शक्तिस्तिष्ठतु नाम। एवं रीत्या अनवस्था ध्रुवं प्रसज्येतेति, तदपि न सम्यक्। शक्ततावच्देदकानुपूव्र्या: सत्त्वे का हानि:, तत्र शक्त्यभ्युपगमे? अन्यथा ततो बोध एव कथं भवेत्?

किञ्च यदुक्तम् - ‘‘गाव्यादय: शब्दा न अनादय:, अपि तु साधवो गवादिशब्दा एवेति न तेषु शक्ति:, अनादिशब्देष्वेव तत्स्वीकारेण व्यवहारोपपत्तौ, आधुनिकेषु गाव्यादिषु तत्स्वीकारे गौरवात्, वैयर्थ्याच्चेति।

तदपि न रूचिकरम्, स्वयमेव भवद्भिः मीमांसकैः मन्यते नानीदृशं जगत् इति किं वा वाल्मीकीयरामायणे सुन्दरकाण्डे श्रीहनूमतोच्यते -

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।**
**रावणं मन्यमाना मां सीता भीता भविष्यति।।**

अनयोक्त्याऽनुमीयते यत् संस्कृता असंस्कृता चेति द्विविधा वाक् प्राक्कालत एव प्रचलति। अन्यथा 'संस्कृता' इति वाचो विशेषणं कथं सङ्गच्छेत? वाग्रूपे विशेष्ये संस्कृतात्वस्य सर्वदा सत्त्वेन व्यभिचाराभावात्। ''सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्'' इति प्रसिद्धनियमविरोधात्।

**एवमेव अध्यात्मरामायणेऽपि भगवता रामेणोक्तम् -**
**बहु व्याहरतानेन न किञ्चिदभाषितम्।। इति**

अनयाप्युक्त्या अपभ्रंशानामनादिता निश्चीयत एवेति साधुवदेव, तत्र शक्तिः प्रमितैवेति निष्कर्षः।

**शक्तिभेदनिरूपणम् -**

वाच्यवाचकभावपदबोध्या शक्तिः। सा त्रिप्रकारा भवतीति रूढिः, योगः, योगरूढिश्च।

**1. रूढिः-**

तत्र रूढिमाह नागेशः - ''शास्त्रकृत्कल्पितावयवार्थाप्रतीतौ यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे सा तदर्थनिरूपिता रूढिः यथा मणिनूपुरादौ। रत्नप्रभाकारस्तु - कल्पितप्रकृतिप्रत्ययार्थ बोधकत्वासमानाधिकरणा या कञ्चिदर्थनिरूपिता शक्तिः सा रूढिरित्युच्यते। कुञ्जिकाटीकाकारस्तु इत्याहु- समुदायार्थमात्रबोधकपदे शक्तीरूढिरित्यर्थः। तदुक्तं हरिणा-

**''वाक्ये त्वर्थान्तरगते सादृश्यपरिकल्पने।**
**केषाञ्चिद्रूढिशब्दत्वं शास्त्र एवानुगम्यते।।''**

अर्थात् - वृत्तिवाक्ययोः सादृश्ये कल्पिते केषाञ्चिच्छब्दानां विग्रहेऽर्थान्तरप्रतीते रूढिशब्दत्वम्। मण्डपशब्दे हि मण्डपानकर्ता विग्रहार्थो भिद्यते। सर्वं चैतदवयव-विभागादिकं कल्पितमेव।

भूषणसारस्य दर्पणव्याख्याकार इत्याह - ''अवयवार्था प्रतीतौ केवलसमुदायस्य तत्तदर्थे या शक्तिः सा रूढिः, तयाऽर्थबोधकं पदं रूढम्। यथा- मणिनूपुरादि।

**अयमाशयः**

व्याकरणशास्त्रेण कल्पिताः विभाजिता ये अवयवा अङ्गानि तेषामर्थस्य यन्मानमपेक्षा तस्याभावे विरहे समुदायेन अवयवौद्येन निरूपिता निद्र्धारिता या शक्तिः रूढिः। यथा मणिः नूपुरः इत्यादौ। शब्दार्थक - 'मण्' धातोरौणादिके इन् प्रत्यये मणिशब्दः सिध्यति। किन्तु सः अवयवलभ्यशब्दकर्तृरूपार्थस्य स्थाने समुदायार्थत्वेन रत्नविशेषं बोधयतीत्यस्य रूढिशक्त्वत्वम्। एवमेव 'नूपुर' इति स्तुत्यर्थकात् नू धातोः सम्पदादित्वात् क्विपि नूः अग्रगमनार्थकात् 'पुर' धातोरिगुपधत्वेन क प्रत्यये कित्त्वेन गुणाभावे पुरः नुवः पुरो नूपुर इति सिध्यति। किन्तु स स्तुतिसम्बन्ध्यग्रगमनकत्रर्थकस्य स्थाने भूषणविशेषं समुदायार्थत्वेन बोधयतीति रूढिशक्तत्वमस्य।

**2. योगः**

विषये नागेशोक्तिः - ''शास्त्रकृत्कल्पितावयवार्थमात्रबोधे योगशक्ति:, यथा पाचकादौ। वैयाकरणभूषणसारस्य दर्पणव्याख्याकार: इत्याहु - ''प्रकृतिप्रत्ययनिरूपिता तत्तदर्थे या शक्ति: स योगस्तन्मात्रेणार्थबोधकं पदं यौगिकमिति व्यवह्रियते। यथा पाचकादिपदम्, तद् घटकधातुप्रत्यययो: पाकादौ, कर्त्रादिकारके च व्युत्पन्नत्वात्।

**अयमाशय: -**

व्याकरणशास्त्रेण कल्पिताः व्युत्पादिताः ये अवयवा: भागास्तेषां योऽर्थस्तेन निरूपितानिद्र्धारिता शक्ति: (अर्थावबोधकसामर्थ्यम्) योग इत्युच्यते। यथा 'पाचक' इत्यादौ। पाकार्थकात् 'पच' धातो: कर्तरि ण्वुलि वोरकादेशे उपधावृद्धौ 'पाचक:' इति सिद्ध: शब्द: पाकक्रियाकर्तृरूपमवयवार्थमेव बोधयति इत्यस्य योगशक्तत्वम्।

**3. योगरूढि: -**

योगरूढि: शब्दस्य व्युत्पत्ति: योगेन सहिता रूढि: योगरूढि:।

न्यायकोशे - **यौगिकार्थ-बुद्धि-रूप-सहकारि-लाभाद्**

**विशिष्टार्थोपस्थापकत्वं रूढे: योगरूढत्वम्।।**

शास्त्रकल्पितावयवार्थान्वित्तविशेष्यभूतार्थनिरूपितं समुदाये बोधकत्वं सा योगरूढि:। यथा पङ्कजादिपदे। कुञ्जिकाटीकाकारस्तु ''अवयवार्थानुसन्धानमूलक-यौगिकार्थापेक्षया रूढ्यर्थस्य प्रथमोपस्थितत्वमेव बलवत्त्वे बीजम्। भूषणदर्पणव्याख्याकारस्तु – यत्रावयवार्थसहकृतासमुदायशक्तिरर्थबोधिका सा योगरूढि: तयाऽर्थबोधकं पदं योगरूढम्। यथा पङ्कजादिपदम्।

**अयमाशय:-**

शास्त्रेण व्याकरणेन कल्पिताः विभक्ताः ये अवयवा भागास्तेषां येऽर्थास्तै-रन्वितो विशिष्ट: विशेष्यभूत: विशेष्यत्वेन गृहीतो योऽर्थस्तेन निरूपिता निद्र्धारिता शक्ति: योगरूढि:। यथा- पङ्कजपदे। पङ्केकर्द्दमे जायत उत्पद्यत इति पङ्क+जन् धातो: सप्तम्यन्तोपपदयोगे डप्रत्यये टिलोपे पङ्कजमिति। तत्र शास्त्रकल्पितावयवा: पङ्क+जन्+ड इत्येते। तदर्थ: पङ्कजनिकर्तृरूपो योऽर्थस्तदन्वितो यो विशेष्यभूतार्थ: पद्मरूपस्तेन निरूपिता शक्तिरत्रेति पङ्कजशब्दस्य योगरूढिशक्तत्वम् पङ्कजशब्दस्य योगरूढिशक्तत्वे हेतुमाह- पङ्कजपदे पङ्क कर्दमो जनिकर्ता उत्पत्ति हेतुर्यस्य तत्। तादृशं पद्मं (कमलम्) इति बोधात्। अत्रावयवार्थ: पङ्कजनिकर्तृरूपस्तदन्वितविशेष्यभूतार्थ: पद्ममित्याशय:।

अत्र न हि पङ्कजशब्दो रूढिमपेक्षते किन्त्ववयवार्थमात्रम्; कह्लारकैरवादौ रूढ्यनुसारेण कमलत्वाभावात्। वस्तुतो द्विविधा योगरूढिस्तत्राद्या अवयवसमुदाय समुच्चयरूपमर्थं बोधयति; यथा पङ्कजमित्यादौ। अपरा तु रूढिमात्रं योगमात्रं वाऽनुसरति यथा उपर्युक्तोदाहरणयो:।

उक्तं यथा कलाटीकायाम् पङ्कजपदात्समुदायशक्त्या उपस्थिते पद्मे पङ्कजनिकर्तृत्वस्यान्वयात्प्रथमप्रतीतत्वम्।

अत एव न केवलयोगेन कुमुदादिबोध:। यत्रावयवशक्तिलभ्या समुदायशक्ति: तत्रेत्यर्थ:। तत्र हि पङ्कजनि कर्तृत्वान्वितं विशेष्यपदम्।

योगरूढ्या तात्पर्यग्राहकवशात् क्वचित् रूढ्यर्थस्य क्वचितु केवलयोगार्थस्य बोध इति। उक्तार्थे भाष्यं प्रमाणयति -

'आर्हादगोपुच्छसङ्ख्यापरिमाणाट् ठक् ' इति सूत्रे अर्थात् ''आर्हाद० इतिसूत्रे सङ्ख्याया: परिमाणात्पृथग्ग्रहणमन्यत्सङ्ख्या अन्यत्परिमाणमिति ज्ञापनार्थम्। तत्र परिमाण-शब्दस्य प्रस्थादिमा-पविशेषरूढ्यर्थग्रहणे तु सूत्रस्यैवासङ्गत्या तस्य योगरूढिशक्त्वत्वं स्वीकृत्य तत्र केवलयौकिगकरूपं परिच्छेदकतामात्रार्थं भाष्ये गृहीतम्। परितो मानं परिमाणमिति।

**उक्तं यथा रत्नप्रभायाम्-**

‘तत्र हि सर्वतो मानार्थकपरिमाण-शब्दस्य प्रस्थादौ योगरूढिरित्युक्त्वा ‘तदस्य परिमाणम् ’ ‘सङ्ख्याया: संज्ञा ’ इति सूत्रयो: विशेष्यविशेषण-भावानुपत्तिमाशङ्क्य ‘‘वचनादीयती विवक्षा भविष्यति’’ इत्युक्त्म्। रूढिपरित्यागेन परिच्छेदकत्वमात्रमाश्रयिष्यत इति भाव:।

योगरूढे: उदाहरणानि- अश्वगन्धा, मण्डपपदं च।

अश्वगन्धा इति पदम् अश्वस्य गन्धो यस्या: सा अश्वगन्धा इति यत्पदं औषधि-विशेषे रूढं, यद्यपि न हि तत्र अश्वगन्धस्य मनागपि संसर्ग:। तदेवपदम् अश्वसम्बन्धिनी या गन्धवत्ता तया वाजितगतगन्धयुक्तत्वेन वाजिशालाबोधे यौगिकं। अत: यौगिकरूढं अर्थात् यौगिकञ्च तत् रूढञ्चेति एकमेव पदं क्वचिद् यौगिकत्वेन क्वचित् रूढत्वेन यत्प्रयुज्यते तदेव यौगिकरूढम् इति उच्यते।

मण्डपपदं मण्डं पिबतीति विग्रहे ‘मण्ड+पा+क’ इति सिद्धं मण्डपपदम्। गृहरूपेऽर्थे रूढं तत्रावयवार्थाबोधनात्। तदेव पदं मण्डपानकर्तरि (मण्डं य: पिबति तस्य बोधे) यौगिकं इति।

समग्रविवेचनोपरान्तं स्पष्टं जायते यत् सामान्यतस्तु योगरूढियौगिक-रूढ्योस्तुल्यविषयत्वं दृश्यते, परन्तु तयोरस्ति वास्तविको भेद:। योगरूढिर्हि योगेन सहिता रूढि: अवयवार्थमादायैव कस्मिश्चिदेकस्मिन् पदार्थेरूढत्वं प्राप्ता। उक्तमेव यौगिकार्थबुद्धिरूपसहकारिलाभाद्विशिष्टार्थोपस्थापकत्वं रूढे: योगरूढ़त्वमिति। तद्विपरीतं यौगिकरूढिस्तु यौगिकञ्च तत् रूढिश्चेति तत्रैव भवति यत्र यौगिकरूढ्यर्थौ स्वातन्त्र्येण प्रयोगे प्रतीत:। योगविशिष्ट रूढितया योगरूढिर्हि शक्तेर्भेद: योगस्य रूढेश्च सम्मिलितरूपतया न यौगिकरूढि: पृथक् शक्ति:। न च भूमौ पङ्कजमुत्पन्नमित्यत्र केवलरूढ्यर्थस्य ‘कह्लारकैरव मुखेष्वपि पङ्केषु’ इत्यत्र केवलयोगार्थस्य बोधनात् पङ्कजपदमपि यौगिकरूढिशक्तिमिति वाच्यं तस्य नानार्थकत्वाभावात् उभयत्रापि तस्मात्कमल-जातेरेव बोधनात्। रूढेर्योगापहारित्वं प्रकरणाद्यभावे एव बोध्यम्। यत्र चावयवार्थानुसन्धानमूलकयौगिकार्थापेक्षया रूढ्यर्थस्य प्रथमोपस्थितिस्तत्र रूढ्यर्थबोधो यत्र तु यौगिकार्थस्य प्रथमोपस्थितत्वं तत्र तस्यैव बलवत्त्वात् यौगिकार्थबोध इति न पङ्कजादिपदात् कुमुदादिबोधवारणाय रूढे: प्रतिबन्धकत्वस्वीकारेऽपि अश्वगन्धाशब्दाद् वाजिशालाबोधे बाधा। प्रकरणाद्यभावे रूढिर्योगापहारिणी सति तु प्रकरणादिके योगार्थबोध इति अवश्वगन्धापदस्य यौगिकरूढत्वमिति।

**अत्र रसगंगाधरसाम्यम् -**

पण्डितराजजगन्नाथेन त्रिधा शक्ति: - रूढि: योग: योगरूढिश्च क्रमश: समुदाय-शक्ति: केवलावयवशक्ति: समुदायावयवशक्तिसंकरश्च स्वीकृता। सेयम् अभिधा त्रिविधा समुदायशक्ति: केवलावयवशक्ति:, समुदायावयवशक्तिसंकरश्च। इति।

शक्तितात्पर्यनिर्णायकनिरूपणम् -

पूर्वोक्तरूपा शक्ति: नानार्थेषु संयोगादिभि: नियम्यते च। तथा चोक्तवान् श्रीहरि: -

**‘‘संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थ: प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधि:।**
**सामर्थ्यमौचितोदेश: कालो व्यक्ति: स्वरादय:।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव:।।**

संयोगादीनामुदाहरणानि - 'सवत्सा धेनु:' 'अवत्सा धेनु:' इति संसर्गविप्रयोगयो-रुदाहरणे। उक्तं यथा कलाटीकायाम् धेनुशब्दो धानकारकस्त्रीव्यक्तिमात्रबोधक: अत्र संयोग पदेन तदर्थमात्र वृत्तितया प्रसिद्धोऽर्थस्य गुणविशेषरूपसम्बन्ध:। तद्ध्वंसो विप्रयोग:। अन्यधेनुपदार्थे तत्सम्बन्धप्रसिद्ध्यभावात्। ध्वंसस्य प्रतियोगिपूर्वकत्वादिति भाव:।

उक्तं यथा रत्नप्राभायाम् - धेनुशब्दस्य नवप्रसूतामात्रवाचकत्वमतेनेदमुक्तम्। नवप्र-सूतगवीमात्रवाचित्वे तु 'सशङ्खचक्रो हरि:' इत्युदाहर्तव्यम्। निषेधस्य प्राप्तिपूर्वकत्वात्प्राप्तेश्च तत्रैव सम्भवाद् 'अवत्सा' शब्देन 'गौ:' एवोच्यते।

**अयमाशय:**

सवत्सा वत्सस्तर्णको गोबालकस्तेन सहिता। धेनु: सकृत्प्रसूता गौ:। धेनुशब्दो हि नवप्रसूतगोमहिषी स्त्र्यादिवाचक: तस्यानेकार्थस्य वत्ससंयोगेन गवि वाचकत्वं नियम्यते। एवम् अवत्सा गौरित्यत्रापि वत्सविश्लेषेण।

साहचर्यस्य रामलक्ष्मणौ इति। साहचर्यं सादृश्यं सदृशयोरेव सह प्रयोग इति नियमात्। उक्तं यथा कलाटीकायाम्-

यत्तु साहचर्यं सहचरता, एकत्र कार्ये प्रसिद्धं परस्परसापेक्षत्वमिति काव्यप्रकाशकृदादयस्तन्नेति ध्वनयन्न। सहचरस्य भाव: साहचर्यम्। सदृशयोरेव सहविवक्षासत्त्वात्। तथा चात्रापि तदेव तन्नियामकम्। अतएव कर्मप्रेति सूत्रभाष्ये ''सदृशानामेव प्रयोगे सहायत्वम्'' इत्युक्तम्।

**उक्तं यथा रत्नप्रभायाम् -**

सदृशयोरेव सहचरणस्य दृष्टतया लक्षणया 'सहचरण' शब्दस्य सदृशार्थबोधकत्वेन साहचर्यं सादृश्यमुच्यते। न च सहचरणरूपसादृश्य ग्रहणे दशरथापत्ययोरेव सहचरणात्तयोरेव 'रामलक्ष्मणौ' इत्यत्र ग्रहणं सिध्यति।

**अयमाशय:-**

सहाचर्यस्य = साहचर्यं सादृश्यं तस्य। उदाहरणं 'रामलक्ष्मणौ रामश्च लक्ष्मणश्च तौ इति। अत्र लक्ष्मणसाहचर्येण मेषजामदग्न्यहलायुधासितश्वेतमनोज्ञादिनानार्थकस्य रामशब्दस्य वाचकत्वं राघवेऽर्थे नियम्यते। तथैव सारसदुर्योधनपुत्रसौमित्रिप्रभृति-नानार्थकस्य लक्ष्मणशब्दस्य वाचकत्वं रामसाहचर्येण सौमित्र्यर्थे नियम्यते।

**विरोधिताया उदाहरणं -**

रामार्जुनगतिस्तयो:। उक्तं यथा कलाटीकायाम् - अत्रापि प्रकरणसहकारेण द्वयोरपि पदयोर्मिथ विरोधिद्वये युगपदेव तात्पर्यग्रह:। एतेन द्वयोरपि नानार्थत्वात्परस्परा-श्रयग्रस्तमिदिमित्यपास्तम्। असङ्कीर्णोदाहरणं तु रामरावणावित्यादि। एवं प्रागपि बोध्यम्।

**उक्तं यथा रत्नप्रभायाम् -**

अत्रोपमायां सदृशलक्षणाप्रयोज्य: विरोधात् परशुरामकार्तवीर्य्ययोर्बोध:। न च 'रामादिपदस्य भार्गवादावभिधानियमने विरोध:, विरोधाच्चाभिधानियमनम्' इत्यत्योन्याश्रय:, 'तयो:' इत्यत्र तत्पदस्य परस्पर विरोध्यर्थप्रतिबिम्बिनप्रयोजकत्वेन युगपदेव विरोधस्फूर्ते:।

**अयमाशय: -**

रामार्जुनयो: या गति: सा गति: इत्यादौ। तत् विरोधेन (शत्रुभावेन) सिध्यतीति। यथा हि अनेकार्थकस्य रामशब्दस्य अर्जुनविरोधित्वात्परशुरामेऽर्थे विरोधेन वाचकत्वं नियम्यते, एवमेव कार्तवीर्यधनञ्जयवृक्ष विशेषप्रभृतिनानार्थकस्य अर्जुनशब्द-स्य रामविरोधित्वात् कार्तवीर्येऽर्थे विरोधेन वाचकत्वं नियम्यते।

**अर्थस्य उदाहरणं -**

'अञ्जलिना जुहोति, अञ्जलिनासूर्यमूपतिष्ठते' इत्यत्र जुहोतीत्यादिपदार्थवशात् अञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वम्।

**उक्तं यथा कलाटीकायाम् -**

इदमुपलक्षणम्। अर्थशब्देनाऽनन्यसाध्यं प्रयोजनमपि। तथा च ''स्थाणु भज भवच्छिदम्'' इत्यत्र भवच्छेदरूपप्रयोजनवशात् स्थाणुपदस्य शिवे नियमनम्।

**उक्तं यथा रत्नप्रभायाम् -**

अञ्जलिनेति- होमकारणतारूपसामर्थ्यवशात्, सूर्योपस्थानकरणरूपसामर्थ्यवशाच्च होमोपस्थानजनकाकारविशेषो लक्ष्यत इति भाव:। अर्थस्योदाहरणम् 'स्थाणुं वन्दे भवच्छिदे' इति। अत्र भवच्छेदरूपप्रयोजनवशात्स्थाणु: = शिव:।

**अयमाशय: -**

स: स: आकारो य: अञ्जलि: तत्परत्वं तद्बोधकपरं वाचकत्वमञ्जलिपदस्येति। आद्ये होमकरणतारूपसामर्थ्यवशात् अञ्जलिपदस्य वर्तुगर्तरूपाञ्जल्यर्थे वाचकत्वनियमनम्, द्वितीये तु उपस्थानकरणरूपसामर्थ्यवशात् अञ्जलिपदस्य तथा करतलान्त्यसंयोजनं यथाञ्जलिर्भवेदत्यिर्थे वाचकत्वनियमनम्। तथेव 'स्थाणुं वन्दे भवच्छिदे' इत्यत्र भवच्छेदनरूप - प्रयोजनवशादनेकार्थकस्य स्थाणुशब्दस्य शम्भ्वर्थे वाचकत्वनियमनम्।

प्रकरणस्य उदाहरणं - सैन्धवमानय इत्यादौ प्रकरणेन तत्।

**उक्तं यथा कलाटीकायाम्** - प्रकरणं वक्तृश्रोतृबुद्धिस्तया तन्नियमनम्।

**उक्तं यथा रत्नप्रभायाम्** - तात्पर्यनियमनमित्यर्थ:। सैन्धवमानयेति- ''सैन्धव'' पदेन भोजनकाले लवणबोधो यात्रादिकाले 'अश्व' बोध:।

**अयमाशय: -**

सैन्धवम् आनय आहर इत्यादौ। तात्पर्यनियमनम्। प्रकरणं वक्तृश्रोतृबुद्धिस्थत्वं तेन भवतीति। यथा सैन्धवपदस्य लवणाश्वाद्यनेकार्थकस्य 'सैन्धवमानय' इत्युक्ते भोजनावसरे प्रकरणेन लवणेऽर्थे वाचकत्वनियमनं यात्राकाले तु तत्प्रकरणेन अश्वेऽर्थे इति।

**लिङ्गस्य उदाहरणं-**

'अक्ता: शर्करा उपदधाति' इत्यादौ 'तेजो वै घृतम्' इति घृतस्तुति रूपाल्लिङ्गाद् 'अक्ता:' इत्यस्य घृतसाधनाञ्चनपरत्वम्।

**उक्तं यथा कलाटीकायाम्-**

लिङ्गमितरव्यावृत्तो धर्मविशेषस्तदाह - घृतस्तुतीति। घृतसेति। बहुव्रीहिरयम्।

**उक्तं यथा रत्नप्रभायाम् -**

मृत्तिका मिश्रा: क्षुद्रपाषाणप्राया: शर्करा: 'कङ्कर' इति नाम्ना लोके प्रसिद्धा:। यद्यपि 'अक्ता:' इत्यत्र न विशेषार्थो नापि 'तेजो वै घृतम्' इति विधिस्तथापि। 'य: स्तूयते स विधीयते'' इति न्यायेन विधायकत्वभप्यस्य कल्प्यम्। शर्करोपधानञ्चाग्न्याधानार्थम्। लिङ्गादिति- संयोगातिरिक्तसम्बन्धेन सम्बद्धो व्यावर्तकधर्मो लिङ्गम्। यथा 'कुपितो मकरध्वज:' इत्यत्र समुद्रव्यावृत्तकोपरूपालिङ्गात् 'मकरध्वज' शब्देन काम:। यत्तु: लिङ्ग चिह्नमिति, तन्न, व्याप्यधर्मस्यैव चिह्नत्वात्, कोपस्य च कामव्याप्यत्वाभावात्।

**अयमाशय: -**

धृतसाधनकं धृतसंसाधितं यद् अञ्जनं लेपस्तत्परत्वं तदवबोधकत्वमिति: अक्ता इत्यस्य लिप्ता इत्यर्थ:। लेपस्तु येन केनापि भवति, किन्तु 'तेजो वै घृतम्' इति घृतगुणप्रशंसनपरकाद् लिङ्गात् अक्ता इति घृतेनाक्ता इत्यर्थे अक्ता इत्येतस्य वाचकत्वनियमनमिति।

अन्यस्य स्वेतरस्यैकार्थबोधकस्य पदस्य सान्निध्यादुदाहरणं-

'रामो जामदग्न्य:' इत्यादौ 'जामदग्न्य' पदसन्निधानेन राम: = परशुराम:।

**उक्तं यथा कलाटीकायाम् -** अर्थस्थले तत्सान्निध्याभावेऽपि तथेति भेद इत्याह पदसन्नीति। नानार्थपदार्थैकार्थमात्ररूपनियतार्थक-शब्दान्तरसामानाधिकरण्येनेत्यर्थ:।

उक्तं यथा रत्नप्रभायाम् - सन्निधि: = पूर्वोक्तरूप: सामानाधिकरणयं वेति 'सशङ्खचक्रो हरि:' इत्यादौ नातिव्याप्ति:।

**अयमाशय: -**

''रामो जामदग्न्य:'' जामदग्न्य इति यत्पदं तस्य सन्निधानात् सामीप्यात्। राम: परशुराम: इति। रामशब्दस्तु नानार्थक: किन्त्वत्र जामदग्न्यपदसान्निध्यादस्य परशुरामेऽर्थे वाचकत्वनियतमिति। जमदग्निसुतो राम: इति प्रसिद्धे:। अत्र एकार्थकशब्दो जामदग्न्यो यस्य सान्निध्येन बह्वर्थको रामशब्दोऽपि परशुरामेऽर्थे नियमितः।

शब्दनिष्ठसामर्थ्यस्य उदाहरणं -

सामर्थ्यम् = निर्दिष्टजननशक्ति:, कारणता वा। कारणता शब्दनिष्ठाऽर्थनिष्ठा वा। अभिरूपाय कन्या देया' इत्यादौ 'अभिरूपतराय इति सामर्थ्यात्प्रतीयते।

**उक्तं यथा कलाटीकायाम्**

सामर्थ्यम् -करणत्वम् तच्च शब्दार्थनिष्ठत्वेन द्विधा। तत्राद्यमत्र। द्वितीयं तु 'मधुना मत्त: कोकिल: इत्यत्र।

**उक्तं यथा रत्नप्रभायाम् -**

अभिरूपतरायेतिदानकरणत्वस्य तत्रैव सत्त्वात्। इदञ्चाभिरूपपदस्य नानार्थकत्वमतेन।

**अयमाशय:**

'अभिरुपाय कन्या देया' इत्यादौ अभिरूपतराय सर्वतोभावेन योग्याय इति सामथ्र्यात् (अभिरूपशब्दनिष्ठसामर्थ्यवशात्) प्रतीयते इति। अभिरूपशब्दो हि कमनीययोग्यानुकूलादिनानार्थक:। अत्र तु अभिरूपपदनिष्ठकन्यादानयोग्यत्वसामर्थ्यव-शात् तस्य वाचकत्वमभिरूपतरेऽर्थे वाचकत्वं नियम्यते कन्यादानकरणत्वस्य तत्रैव सत्त्वात्। अर्थनिष्ठसामर्थ्यस्य तत्तु ''मधुना मत: कोकिल:'' इत्यादौ। अत्र वसन्त एव कोकिलं नादयितुं प्रभवतीति मधुशब्दार्थसामर्थ्यवशान् मधुशब्दस्य वसन्तार्थे नियमितं वाचकत्वमिति।

औचित्यं योग्यता तस्य उदाहरणं -

**यश्च निम्बं परशुना यश्चैनं मुधसर्पिषा।**<br>**यश्चैनं गन्धमाल्याद्यै: सर्वस्य कटुरेव स:।।**

इत्यत्रौचित्यात् परशुना इत्यस्य छेदनार्थत्वम्, मधुसर्पिषा इत्यस्य सेचनार्थत्वम् गन्धमाल्याद्यैरित्यस्य पूजनार्थत्वम्।

**उक्तं यथा कलाटीकायाम् -**

परशो: कारकत्वेनानेकक्रियासन्देहे योग्यतायाः अध्याहारेण छेदनान्वयित्व इति। आदिना 'यश्चैनं मधुसर्पिषा। यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव स:। इत्यत्र सेचनाद्यन्वयित्वं बोध्यम्।

उक्तं यथा रत्नप्रभायाम् - परशुनेति अत्र च्छेनक्रिया गम्यते।

**अयम्भाव: -**

परशोश्छेदने एव, मधुसर्पिषो: सेचने एव, गन्धमाल्यादीनां पूजने एव- योग्यताऽस्तीति परशुना छिनत्ति, मधुसर्पिभ्र्यामभि-षिञ्चति गन्धमाल्याद्यैश्च पूजयतीति औचित्यादर्थबोध:। अत्रेदमवधेयं यत्सामर्थ्ये हि कारणता विशिष्यते औचित्यं तु तत्सम्पादनयोग्यता। 'मधुना मत्त: कोकिल:' इत्यत्र मादने वसन्तस्यैव कारणतेति मधुशब्दस्य सामर्थ्यमाश्रित्य वसन्तार्थकत्वं 'पातु वो दयितामुखम्' इत्यत्र तु प्रेयसीसामुख्ये नैव प्रियरक्षणमुचितमिति मुखशब्द: साम्मुख्येऽर्थे नियमित:।

**देशस्य उदाहरणं -**

भात्यत्र परमेश्वर इत्यत्र राजधानीरूपदेशात् परमेश्वरपदं राजबोधकम्।

**अयमाशय:-**

परमेश्वर शब्दो नानार्थक: ईश्वरे राजनि सामर्थ्यवति जने च प्रसिद्ध:, किन्त्वत्र राजधानीरूपदेशबलात् तदन्वयाय नृपार्थेऽस्यार्थो नियमित:।

**काल: समयस्तस्य उदाहरणं**

'चित्रभानुर्भाति' इत्यादौ रात्रौ वन्हौ, दिवा सूर्ये।

**अयम्भाव:**

चित्रभानु: चित्रा भानव: किरणा: यस्येति चित्रभानु:। निशायाम् अग्न्यर्थे। दिवसकाले सूर्ये इति। चित्रभानुपदं हि वह्नौ सूर्ये चाऽर्थे प्रसिद्धं, किन्तु वह्ने: शोभनं रात्रावेव सम्भवति, सूर्यस्य तु दिवैवेति चित्रभानुपदं दिवा सूर्येऽर्थे रात्रौ वह्न्यर्थे नियमितम्। व्यक्तिरिति लिङ्गं स्त्रीपुंस्त्वादिः तस्या: उदाहरणम् - व्यक्ति=लिङ्गम्। 'मित्रो भाति' मित्रं भाति' अत्राद्ये सूर्य:, अन्त्ये सुहृत्।

उक्तं यथा रत्नप्रभायाम् - मित्रो भातीतिपुल्लिङ्गेन सूर्य:। मित्रं भातीति- क्लीबेन सुहृत।

**अयम्भाव: -**

मित्रो भाति, मित्रं भाति इत्यादौ। आदौ प्रथमे सूर्य: (आदित्य:)। अन्त्ये (द्वितीये) सुहृत्, (मित्रम्) इति। 'मित्रो भाति' इत्यत्र मित्रशब्द: पुंसि वर्तते, तेन स: सूर्येऽर्थे नियमितो लिङ्गवशात्। मित्रं भाति इत्यत्र तु मित्रशब्द: क्लीवे वर्तते, तेन तस्य सुहृदर्थे लिङ्गवशाद्वाचकत्वं नियमितम्।

स्वर उदात्तादिस्तस्य उदाहरणम् -

''स्थूलपृषतीम्'' इत्यादौ स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णय:।

स्थूला पृषती गौ:, स्थूलानि पृषन्ति यस्या इति वा सन्देह:। पूर्वपदप्रकृतिस्वराद् बहुव्रीह्यर्थावगम:।

**उक्तं यथा रत्नप्रभायाम्**

स्थूलपृषतीमिति- स्थूला चासौ पृषती तथा स्थूलानि पृषन्ति यस्यामिति सन्देहे पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थनिर्णय:।

**उक्तं यथा - पातञ्जलमहाभाष्ये-**

''याज्ञिका: पठन्ति '' स्थूलपृषतीमग्निवारुणीमनड्वाहीमालभेत'' इति। तस्यां सन्देह: 'स्थूला चासौ पृषती च स्थूलपृषती' इति 'स्थूलानि वा पृषन्ति यस्या: सेयं स्थूलपृषती' इति? तां नावैयाकरण: स्वरतोऽध्यवस्यति यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहि: अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति।

**अयम्भाव:**

स्थूला चासौ पृषती इति कर्मधारय: (तत्पुरुष:)। बहुव्रीहिस्तु - स्थूलानि पृषन्ति यस्याम् इति। अत्र पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थनिर्णय:, 'बहुव्रीहौ' प्रकृत्यापूर्वपदम् ' इति सूत्रात्। अन्तोदात्तत्वे तु तत्पुरूषार्थनिर्णय: 'समासस्य ' इति सूत्रात्।

स्वरादय: इत्यत्र पठितादादिपदात् षत्वसत्वणत्वनत्ववक्तृबोद्धव्यवैशिष्ट्यप्रतिभादि-सहकारादिभिरपि अर्थनिर्णय: इति लघुमञ्जूषायाम्। यथा सुसिक्तमित्यत्र 'सु: पूजनार्थ:, 'सु पूजायाम्' इति पूजार्थे सो: कर्मप्रवचनीय संज्ञात्वेनोपसर्गत्वाभावान्न उत्तरवर्तिसस्य षत्वमिति। सुषिक्तमित्यत्र तूपसर्गस्य पूजातिरिक्तार्थ:। प्रणायक इति णत्वेन प्रणयनक्रिया-कर्ता अनायक इत्यस्य तु प्रगतनायकदेशबोधो णत्वाभावात् इति।

॥ इति शक्तिनिरूपणम्॥

सन्दर्भग्रन्थाः


1. पाणिनिः, पाणिनीयशिक्षा
2. नन्दिकेश्वरः, काशिका
3. वामन-जयादित्यौ, काशिका
4. वामनजयादित्यौ, काशिका
5. भट्टिकाव्यस्य जयमंगलाटीका
6. पतञ्जलिः, व्याकरणमहाभाष्यम्
7. पाणिनिः, अष्टाध्यायी, 6:1:92
8. पाणिनिः, अष्टाध्यायी - 1/2/25
9. पाणिनिः, अष्टाध्यायी, 6/1/130
10. पाणिनिः, अष्टाध्यायी, 7/2/63
11. यास्कः, निरुक्तम्, 1/4/1
12. पतञ्जलिः, व्याकरणमहाभाष्यम्
13. पाणिनिः, अष्टाध्यायी, 5/4/11